No. १३१९

Title नवीन मतम्.

Author श्रीहरिराम तर्कवागीश:

Extent ३१ Age ×

Subject न्याय वैशेषिकं

नवीनमतम्

१३।५

३१ पत्रे

नं. १२६५

नवीनमत
५६.

१

१२०

॥ ॥श्रीगणेशायनमः॥ ॥अनुमितिंप्रतिपर्वतीयधूमव्यापकोवह्निरित्याकारकःपरामर्शएवहेतुर्नतुवह्नि
व्याप्यधूमवान्पर्वतइत्याद्याकारकः।तद्धेतुत्वेकारणतावच्छेदककोटौव्यापकसामानाधिकरण्यरूपव्याप्तिघ
टकीभूतसामानाधिकरण्यादिपदार्थविषयतानिवेशाधिक्येनगौरवादितिव्यापकताज्ञानहेतुत्ववादिनः॥
अथैतन्मतेयत्रपर्वतीयधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावघटितापर्वतीयधू
मत्वावच्छिन्ननिरूपितव्यापकतानवह्नौगृहीताऽपितुधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामा
न्याभावघटितधूमसामान्यव्यापकतैवतत्रोपदर्शितपरामर्शासंभवेनानुमित्यपलापप्रसंगइतिचेत्।नहिव्या
पकताज्ञानहेतुत्ववादिनापक्षीयहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावावगाहि
ज्ञानस्यहेतुतांगीक्रियतेयेनोक्तानुपपत्तिःस्यात् अपितुहेत्वंशेउपलक्षणविधयापक्षीयत्वावगाहिनोहे राम
तुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावावगाहिज्ञानस्यैवेतिनदोषः।अथैतन्मतेपर्वतोवह्नि ॥१॥

समानाधिकरणाभाववानित्याद्याकारकोपनीतभानशाब्दबोधादिकंप्रतिपर्वतादिपक्षकवह्न्याद्यनुमितिसा
मग्र्याःप्रतिबंधकत्वकल्पनाधिक्याद्गौरवं·व्याप्तिविशिष्टहेतुप्रकारकपक्षविशेष्यकपरामर्शहेतुतामतेतथावि
धोपनीतभानादेस्साध्यसामानाधिकरण्यविशिष्टहेतुमत्तावगाहिनस्तादृशपरामर्शस्यबाधमुद्रयाप्रतिबंधक
तायाःक्लृप्तत्वात्ततएवतादृशानुमितिसामग्रीदशायांतदनुत्पादोपपत्तेःसामग्रीप्रतिबंधकतायास्तत्राकल्पनादि
तिचेदस्त्वेतादृशलाघवंतथापिव्याप्तिविशिष्टहेतुप्रकारकपरामर्शहेतुतामतेऽआलोकव्यापकवह्निसमानाधिकर
णधूमवान्पर्वतइत्यादिज्ञानादनुमित्यापत्तेर्वारणायतादृशज्ञानसत्त्वेभिन्नविषयकप्रत्यक्षाद्युपपत्तयेचपराम
र्शहेतुतायांसामग्रीप्रतिबंधकतायांचविशिष्यहेतुतावच्छेदकविषयतानिवेशस्यावश्यकतयाहेतुतावच्छेदकभे
देनतद्बाहुल्यप्रयुक्तंमहागौरवं।अस्माकंतुसर्वत्रहेतुविषयतानांकिंचिद्धर्मावच्छिन्नविषयतात्वेनैवनिवेशान्नहे
तुतावच्छेदकभेदेनकार्यकारणभावादिबाहुल्यमिति।अत्रोच्यते।व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टहे

तुमत्तापरामर्शत्वेनैवकारणताऽस्माभिरुपगम्यतेतदैवोपदर्शितगौरवानामवसरः वयंतुसाध्याभाववदवृत्तित्व
विशिष्टहेतुमत्तापरामर्शत्वेनैवहेतुतामुररीकरिष्यामः नचतत्रकिमपिगौरवंसंभवतिप्रत्युतव्यापकत्वापेक्षया
साध्याभाववदवृत्तित्वस्यलघुशरीरतयालाघवमेवेति। वस्तुतस्तु अभावप्रत्ययोयादृशविशिष्टधर्मप्रतियोगि
तावच्छेदकत्वमवगाहतेतादृशोविशिष्टधर्मएवप्रतियोगिनिष्ठविशेषणतायामवच्छेदकतयातत्रभासतेयथाशुद्ध
घटत्वादिप्रतियोगितावच्छेदकत्वावगाहिनोनीलघटत्वाद्यवच्छिन्नप्रतियोगिविशेषणताकाभावप्रत्ययस्याप्रामा
णिकत्वात्तथाचशुद्धधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठाभावप्रतियोगितावच्छेदकत्वावगाही
पर्वतीयधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नविशेषणताकज्ञानमेवासिद्धमिति पर्व
तीयत्वघटिततादृशधर्मनिष्ठप्रतियोगितावच्छेदकत्वावगाहिपरामर्शस्यैवहेतुत्वंस्वीकरणीयं तथाचोपदर्शि राम
तस्थलेनुमित्यपलापोदुर्वारएवेति यत्किंचिद्विशिष्टहेतुमत्तापरामर्शहेतुतामतमेवसाधीयः। तथाप्यभावोनसा ॥२॥

धीयइत्याकारकाभावत्वावच्छिन्नधर्मिकप्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकसाध्याभाववत्तानिर्णय
दशायांसाध्याभाववदवृत्तिमान्पक्षइत्येतादृशपरामर्शासंभवादनुमित्यनुपपत्तिर्दुर्वारैवेतिचेत्‌ नेष्यतएवतत्रानु
मितिः। एवंविशिष्टसत्तायाःसत्तानतिरिक्ततयाद्रव्यत्वाभाववदवृत्तित्वविरहात्तद्धेतुकद्रव्यत्वादिनिरूपितव्याप्ति
ज्ञानस्यप्रमात्वविरहेपिनक्षतिः।तत्रभ्रमात्मकपरामर्शादेवानुमित्यभ्युपगमात्‌ एवंजातिमान्सत्वादित्यादाव
पिभ्रमात्मकपरामर्शादेवानुमितिरुपेयते। तस्तत्रसाध्याभाववत्तिसामान्याद्योहेतुतावच्छेदकीभूतसमवायादिसं
बंधेनवृत्तेरप्रसिध्यातदभावरूपव्याप्तेरप्रसिद्धावपिनक्षतिः।अवृत्तिगगनादौसाध्याभाववदवृत्तित्वरूपव्याप्तिसत्वे
पिविशेषदर्शिनांपक्षधर्मताज्ञानविरहादेवनानुमितिः।यदिचगगनमवृत्तीत्याकारकविशेषदर्शनकालेपिप
क्षविशेष्यकतादृशगगनादिप्रकारकस्यसाध्याभाववदवृत्तिगगनवान्पक्षइत्याकारकपरामर्शस्योत्पत्तौबाधका
भावः।अवृत्तित्वग्रहस्यवृत्तित्वप्रकारकग्रहंप्रत्येवग्राह्याभावावगाहितयाविरोधित्वात्तादृशपरामर्शप्रतिविरो

3

धित्वे प्रमाणाभावादिति विभाव्यते तदा तत्रानुमित्यभावस्य प्रामाणिकत्वे साध्याभाववदवृत्तित्वविशिष्टवृत्तिमत्वं
व्याप्तिरित्येवानुसरणीयं। तादृशव्याप्तिग्रहे चावृत्तित्वग्रहस्य विरोधित्वे न कस्यापि विप्रतिपत्तिः। वस्तुतस्तु तद्ग्रहाग्रे
हं प्रति तद्धर्मधर्मिकावृत्तित्वज्ञानस्यापि विरोधित्वमनेकग्रंथकारसंमतं सयुक्तिकं च तत्कल्पने च पर्वतो वह्निमानि
त्याकारकानुमित्यादौ वह्निरवृत्तिरित्याकारकविशेषणतावच्छेदकप्रकारकनिर्णयादिघटितायां इच्छाविशिष्टाया
ऽवृत्तिर्वह्निमानित्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिसामग्र्याः प्रतिबंधकत्वा कल्पनेन लाघवा
त्। तथा च गगनमवृत्तीत्येतादृशज्ञानकाले गगनादिप्रकारकज्ञानमपि नोत्पद्यत एवेति वदंति। अत्रेदं चिंतया
मः। व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैवानुमितिहेतुत्वमुचितं तथा सति तादृशज्ञानप्रतिबध्येऽभा
वो न हेतुसमानाधिकरणः प्रतियोगितानाभावीयेत्याद्याकारकोपनीतभानादावनुमितिसामग्र्याः प्रतिबंध राम
कत्वाकल्पनेन लाघवात्। अनुमितिसामग्रीकाले बाधबुद्ध्या तादृशज्ञानं प्रति क्लृप्तप्रतिबंधकताकस्य व्याप ॥३॥

पकसामानाधिकरण्यनिर्णयस्यसत्त्वान्नतएवतादृशोपनीतभानादिवारणोपपत्तेः। साध्याभाववदवृत्तित्वरू
पव्याप्तिज्ञानहेतुतामतेपिनप्रतिबध्यीभूतमभावोनसाध्यीयइत्याद्युपनीतभानादिकंप्रत्यनुमितिसामग्र्याःप्रति
बंधकत्वाकल्पनेनलाघवसंभवात्साम्यमितितुनवक्तव्यंयतोगुरुशरीरव्याप्तिज्ञानप्रतिबध्यज्ञानानांलघुशरी
रव्याप्तिज्ञानप्रतिबध्यज्ञानापेक्षयाबहुविधतयागुरुशरीरव्याप्तिज्ञानहेतुतामतेऽनेकविधज्ञानेऽनुमितिसा
मग्रीप्रतिबंधकतात्रुटिर्लघुशरीरव्याप्तिज्ञानहेतुतामतेतुस्वल्पस्थलेतुतथेतिकारणीभूतज्ञानविषयस्यश
रीरगौरवमेवलाघवसंपादकमिति। अथमास्तुव्याप्तेःशरीरगौरवप्रयुक्तगौरवंएवमपिव्यापकसामानाधि
करण्यरूपव्याप्तेर्हेतुतावच्छेदकघटिततयाहेतुतावच्छेदकभेदेनपरामर्शहेतुतायाअनुमितिसामग्रीप्रतिबं
धकतायाश्चानंत्यप्रयुक्तगौरवंदुर्वारमेव। साध्याभाववदवृत्तित्वरूपव्याप्तेश्चहेतुतावच्छेदकाघटिततयाहेतु
तावच्छेदकविषयतानिवेश्यवह्निव्याप्यधूमवानयंपर्वतोवह्निव्याप्यालोकवानित्याकारकबहुविधपरामर्शानां

साध्याभाववदवृत्तित्वावच्छिन्नप्रकारताकनिर्णयत्वेनैकहेतुतायाएवसंभवात्तादृशव्याप्तिज्ञानहेतुतामतेहे
तुतावच्छेदकभेदेनपरामर्शहेतुतायाअभेदात्।नचव्यापकसामानाधिकरण्यज्ञानहेतुतामतेहेतुविषयतायां
विशिष्यधूमत्वाद्यवच्छिन्नविषयतात्वेननिवेशानएवतन्मतेहेतुतावच्छेदकभेदेनपरामर्शहेतुतावाकुल्यंतदेव
कुतःसामान्यलोग वच्छिन्नविषयतात्वेनहेतुविषयतानिवेशनेप्युपपत्तेरितिवाच्यं।हेतुविषयतायाविशिष्यधू
मत्वाद्यवच्छिन्नविषयतात्वेनानिवेशेआलोकव्यापकवह्निसमानाधिकरणधूमवानित्यादिनिर्णयवारणा
संभवात्तस्मात्तन्निवेशस्यावश्यकत्वादितिचेन्न।हेतुतावच्छेदकंविशिष्यानिवेश्यधूमालोकादिपरामर्शसाधार
णस्यनिर्णयत्वस्यदुर्वचतयासाध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानहेतुतामतेपिहेतुतावच्छेदकभेदेनपरामर्श
हेतुत्वादिवाकुल्यमावश्यकंतथाहिवह्निव्याप्यप्रतियोगिताकाभावाप्रकारकत्वेसतिवह्निव्याप्यप्रकारक राम
त्वंननिर्णयत्वंवह्निव्याप्यालोकवान्पर्वतःपर्वतोवह्निव्याप्यधूमवानित्येतादृशांशिकनिर्णयासंग्रहात्।न। ॥४॥

पिवह्निव्याप्यत्वावच्छिन्नसामान्याभावाप्रकारकत्वेसतितदवच्छिन्नप्रकारकत्वंवह्निव्याप्यधूमवान्नवापर्वतइत्येता
दृशसंशयस्यापितादृशसामान्याभावाप्रकारकत्वेनतथात्वप्रसंगात्।तादृशसामान्याभावाप्रकारकत्वेसतिशुद्ध
वह्निव्याप्यत्वावच्छिन्नप्रकारताकत्वनिवेशेचवह्निव्याप्यधूमवान्पर्वतइत्यादिनिश्चयस्याप्यसंग्रहस्तादृशज्ञानीयधू
मत्वावच्छिन्नव्याप्यप्रकारतायाःकेवलवह्निव्याप्यत्वावच्छिन्नत्वविरहात्।नचतादृशनिर्णयेफलानुरोधेनवह्निव्याप्य
वान्पर्वतइत्यादिनिर्णयसाधारणीशुद्धवह्निव्याप्यत्वावच्छिन्नप्रकारतापिस्वीक्रियतेऽतोनतदसंग्रहःवह्निव्याप्यधू
मवान्नवापर्वतइत्यादिसंशयेचतादृशप्रकारतायाःकल्पकाभावान्नातिप्रसंगः।यत्रचसंशयेतादृश्यपिप्रकारता
प्रामाणिकीसतावत्वह्निव्याप्यधूमवान्नवापर्वतःपर्वतोवह्निव्याप्यवानित्याकारकएवतस्यचअनुमितिजनक
त्वेनकेचिदपिविप्रतिपद्यंतइतिवाच्यं।वह्निव्याप्यधूमवान्पर्वतइत्याकारकनिखिलनिर्णयेषुशुद्धवह्निव्याप्य
त्वावच्छिन्नप्रकारतायाअनुभवविरुद्धत्वात्तत्स्वीकारेसर्वेषांतथाविधनिर्णयानांवह्निव्याप्यधूमवान्वह्निव्या

प्यवांश्च पर्वत इत्याद्याकारकत्वाप्रसंगः। वस्तुतस्तु शुद्धवह्निव्याप्यत्वावच्छिन्नप्रकारतया वह्निव्याप्यधूमवान्
न वा पर्वत इत्याद्याकारकसंशयसाधारण्यवारणाय तत्रानुगतनियामककल्पनमावश्यकं एवं चोपदर्शितनि
र्णयेषु तदभ्युपगमे तत्तन्निर्णयव्यक्त्युत्पादकानामनंतानामनुगतहेतूनां तादृशविषयताप्रयोजकत्वकल्पने महा
गौरवम्· एवं विरोधिसामग्रीकालीनस्य वह्निव्याप्यधूमत्वावच्छिन्नप्रकारताकप्रत्यक्षं जायतामित्येतादृशेच्छाधी
न वह्निव्याप्यधूमवानित्यादिनिर्णयस्य तथाविधप्रकारताशालित्वं न संभवति तादृशप्रकारताशालिबोधे व
ह्निव्याप्यत्वावच्छिन्नप्रकारताकप्रत्यक्षं जायतामित्येतादृशेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबंधकत्वात्।
न चैवमुपदर्शितानामपीच्छानामप्रयोजकत्वोपगमान्न तादृशेच्छाकालीननिर्णयस्य शुद्धव्याप्यत्वावच्छिन्न
प्रकारताशालित्वानुपपत्तिरिति वाच्यं। तथा सति तादृशेच्छाभावैः सह वह्निव्याप्यत्वावच्छिन्नप्रकारताकप्रत्यक्षं राम
जायतामित्येतादृशेच्छायाश्चाभावस्य विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबंधकताबाहुल्यप्रसं ॥५॥

गात्।तादृशेच्छाकालेधूमत्वादिभासकसामग्र्यसत्वेविरोधिसामग्रीदृशायांवह्निव्याप्यवान्पर्वतइत्याकारकज्ञाना
पत्तेः।अथपर्वतत्वावछिन्नविशेष्यतानिरूपिताभावप्रकारतानिरूपितप्रतियोगितासंसर्गावछिन्नप्रकारता
न्यायापर्वतत्वावछिन्नविशेष्यतानिरूपितव्याप्यत्वावछिन्नप्रकारताशालिज्ञानत्वमेवपर्वतत्वावछिन्नधर्मि
कवह्निव्याप्यवज्ज्ञानिर्णयत्वंप्रकारताचप्रकारभेदात्प्रकारतावछेदकभेदाच्चभिन्नानतुविशेष्यादिभेदात्पमा
नाभावात्।एवंचवह्निव्याप्यधूमवान्नवापर्वतइत्यादिसंशयीयपर्वतविशेष्यतानिरूपितधूमप्रकारतायां
स्तादृशाभावप्रकारतानिरूपितप्रकारत्वाभिन्नतयानातिप्रसंगः।वह्निव्याप्यालोकवान्नवावह्निव्याप्यधूमवा
न्पर्वतइत्यादिसमूहालंबनेचनतथाविधधूमप्रकारतायाअभावविशेष्यतानिरूपितालोकादिप्रकारताभिन्नत्वा
न्नतत्संग्रहः।यत्तुवह्निव्याप्यधूमवान्नवापर्वतइत्यादिसंशयेपिपक्षीयविशेष्यतानिरूपितसंयोगादिसंसर्गा
वछिन्नप्रकारतायाअभावविशेष्यतानिरूपितप्रतियोगितासंसर्गावछिन्नप्रकारताताभेदआवश्यकः तदभे

6

देतादृशज्ञानस्यपर्वतविशेष्यतानिरूपितप्रतियोगितासंसर्गावच्छिन्नधूमप्रकारताशालित्वात् तस्यप्रतियो
गितासंसर्गावच्छिन्नप्रतियोगिताकधूमाभावप्रकारकपर्वतविशेष्यकपर्वतोनधूमीयइत्याकारकबाधादिप्रति
बध्यत्वप्रसंगात् तादृशधूमप्रकारतायाएवतथाविधबाधादिप्रतिबध्यतावच्छेदकत्वादिति· तन्न· पर्वतविशेष्यतानि
रूपितप्रतियोगितासंसर्गावच्छिन्नधूमप्रकारताकबुद्धित्वंनतथाविधबाधादिप्रतिबध्यतावच्छेदकं अपिपर्वतत्वा तु४
वच्छिन्नविशेष्यतानिरूपितप्रतियोगित्वसांसर्गिकविषयतावच्छिन्नधूमप्रकारताकबुद्धित्वंउपदर्शितसंशयेस
प्रतियोगितासंसर्गावच्छिन्नप्रकारतायाः पर्वतनिष्ठविशेष्यतानिरूपितत्वेपि तादृशप्रकारतानिरूपितप्रतियो
गित्वसांसर्गिकविषयतायानतन्निरूप्यत्वमपितुसंयोगीयसांसर्गिकविषयतायाएवातोनास्योपदर्शितप्रति
बध्यतावच्छेदकाक्रान्तत्वमिति तत्रधूमप्रकारतैक्यंनिराबाधमितिचेन्नैवं। वह्निव्याप्यधूमवान्वह्निव्याप्यधूमा राम
भाववान्वापर्वतइत्येतादृशसंशयीयपर्वतविशेष्यतानिरूपितधूमप्रकारतायाः स्वावच्छेदकतासमनियता ॥६॥

वच्छेदकताकाभावविशेष्यतानिरूपितधूमप्रकारत्वाभेदोक्तिसंभवेपिवह्निव्याप्यधूमवान्धूमाभाववान्वापर्वत
इत्येतादृशसंशयीयपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमत्वावच्छिन्नप्रकारतायाअभावविशेष्यतानि
रूपितशुद्धधूमत्वावच्छिन्नप्रकारत्वाभेदोक्तिर्नसंभवति। तथासतिवह्निव्याप्यधूमवान्वह्निव्याप्यधूमाभाववान्वा
पर्वतइत्येतादृशसंशयात्तदवैलक्षण्यप्रसंगात्तथाचतादृशसंशयसाधारण्यमुपदर्शितनिश्चयत्वस्यदुर्वारमे
व। अथतादृशसंशयेपिपर्वतविशेष्यतानिरूपितधूमप्रकारताभावविशेष्यतानिरूपितधूमप्रकारतयोर
भेदःस्वीक्रियते। नचोपदर्शितसंशयात्तदवैलक्षण्यप्रसंगःपतउपदर्शितसंशयेऽभावविशेष्यताधूमप्रकारतयो
र्वह्निव्याप्यत्वविशिष्टधूमत्वावच्छिन्नप्रकारतात्वेननिरूप्यनिरूपकभावस्तादृशसंशयेचकेवलधूमत्वावच्छिन्नप्र
कारतात्वेनेतिप्रकारताविशेष्यतयोर्निरूप्यनिरूपकभाववैलक्षण्यादेवतद्वैलक्षण्यमुपपद्यतइतिचेत्तन्न। एवं
सतिवह्निव्याप्यनीलधूमाभाववान्पर्वतोवह्निव्याप्यधूमवांश्चेत्येतादृशसमुच्चयीयतथाविधधूमप्रकारता

भेदोप्यसिद्धः तद्वीजस्य वह्निव्याप्यनीलधूमवान्नवा पर्वतइत्येतादृशसंशयात्तादृशसमुच्चये वैलक्षण्यस्यत
द्भेदेपित्वदुक्तरीत्योपपादयितुंशक्यत्वात् तथाच तादृशसमुच्चयादपि अनुमित्यनुदयप्रसंगः। यत्तु संशयेभा
वाभावोभयकोटिप्रकारतानिरूपितविशेष्यताएकैव समुच्चयेतु प्रकारताभेदेनविशेष्यताभेदः। एवंचव्याप्यप्रति
योगितालोकाभावप्रकारत्वानिरूपितव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकज्ञा
नत्वमेवव्याप्यवत्तानिर्णयत्वमिति। तदप्यसत्। वह्निव्याप्यधूमवह्निव्याप्यालोकाभावादिकमेकत्रद्वयमितिरीत्या
पक्षांशेऽवगाहमानस्यापि तादृशधूमालोकाभावादिप्रकारतानिरूपितैकविशेष्यताकतया तदसंग्रहप्रसंग
त्। तत्रविशेष्यताभेदेसमूहालंबनात् वह्निव्याप्यधूमवान्पर्वतश्चालोकाभाववान्पर्वतइत्येतादृशज्ञानात् वह्नि
व्याप्यधूमवान्पर्वतश्चालोकाभाववान्पर्वतइत्येतादृशस्यैकत्रद्वयमितिरीत्या धूमालोकाभावादिप्रकारक राम
ज्ञानस्यावैलक्षण्यप्रसंगात्। केचित्तु स्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसंबंधेनपर्व ॥७॥

तत्वावछिन्नविशेष्यतानिरूपिताभावविषयता निरूपितप्रतियोगिप्रकारताविशिष्टान्यायापर्वतत्वावछि
न्नविशेष्यतानिरूपितव्याप्यत्वावछिन्नप्रकारतातन्निरूपकज्ञानत्वमेव प्रकृते व्याप्यनिर्णयत्वं वह्निव्याप्यालो
काभाववान्वह्निव्याप्यधूमवांश्चेत्ये तादृशज्ञानीयपक्षीयविशेष्यतानिरूपितव्याप्यत्वावछिन्नप्रकारतानोपद
र्शितोभयसंबंधेन कयाचिदपि तादृशाभावविशेष्यतानिरूपितप्रकारतया विशिष्टा तादृशज्ञानीयतथाविधा
लोकप्रकारतायास्तत्र च स्वावछेदकावछिन्नत्वविरहात् । अन्यज्ञानीयतथाविधधूमत्वावछिन्नप्रकारतायाश्च
२५ स्वनिरूपकज्ञान[redacted]निरूपितौ विरहात् वह्निव्याप्यधूमवान्नवापर्वत इत्यादिसंशयीयपक्षविशेष्यतानिरूपितव्या
प्यत्वावछिन्नप्रकारता चोक्तोभयसंबंधेन तादृशज्ञानीयाभावविशेष्यतानिरूपितधूमत्वावछिन्नप्रकारतावि
शिष्टैवेति न तत्संग्रहः । संबंधघटकदलद्वयप्रयोजनं तु स्फुटमेव स्वावछेदकावछिन्नत्वं च स्वावछेदकताव्यापकावछेद
कताकत्वं । अतो वह्निव्याप्यालोकाभाववान्वह्निव्याप्यधूमवांश्च पर्वत इत्ये तादृशज्ञानीयपक्षविशेष्यतानिरूपित

धूमप्रकारतायास्तज्ज्ञानीयाभावविशेष्यतानिरूपितालोकनिष्ठप्रकारतावच्छेदकीभूतव्याप्यत्वावच्छिन्नत्वेपिनक्ष
८ तिः। आलोकत्वसाधारणतादृशप्रकारतावच्छेदकताभिन्नतादृशधूमत्वप्रकारतावच्छेदकतायाअव्यापकत्वात्
स्वावच्छेदकताव्यापकावच्छेदकताकत्वघटितोभयसंबंधेनतत्रतद्वैशिष्ट्याभावादित्याहुस्तदप्यशुद्धं। तथासतिज्ञा
नविशेषत्वादिना यत्राभावप्रतियोग्यंशे धूमत्वादिकं विशेषणतयाभातं तत्र वह्निव्याप्यधूमवान्पर्वतोऽग्निविशे
षवदभाववांश्चेत्याकारकतादृशज्ञानादनुमित्यनुदयापत्तेः। धूमत्वमात्रवृत्त्यभावविशेष्यतानिरूपिततज्ज्ञानी
यप्रकारतावच्छेदकतांप्रतिपक्षविशेष्यतानिरूपितव्याप्यप्रकारतावच्छेदकतायाः व्यापकत्वात्। एवंज्ञानव्य
क्तिभेदेनविषयताभेदस्याप्रामाणिकतयावह्निव्याप्यधूमवान्पर्वतइत्यादिनिश्चयीयव्याप्यप्रकारतायाःसंशयात्म
कज्ञानीयाभावविशेष्यतानिरूपितप्रकारताविशिष्टप्रकारत्वाभिन्नत्वात्तादृशप्रकारताविशिष्टान्यव्याप्यप्रकार राम
तेवाप्रसिद्धेरितिनकिंचिदेतत्। केचित्तुविरोधानवच्छिन्नसंयोगादिनिष्ठसांसर्गिकविषयतानिरूपितवह्निव्याप्यत्वा १८॥

वच्छिन्नप्रकारताकज्ञानत्वमेव निश्चयत्वं। संशयीयसंयोगादिनिसांसर्गिकविषयतायाश्च विरोधावच्छिन्न
त्वात्तथात्वावृत्तिः। निश्चये च कुत्रचिदपि विरोधस्य संसर्गकोटिनिविष्टतयाभानानभ्युपगमाददोषः। न च हेतुतावच्छे
दकघटितस्य वह्निव्याप्यधूमाभाववदवृत्तित्वादिरूपविरोधस्य निवेशे हेतुतावच्छेदकभेदेन परामर्शकारणता
दिभेदश्चावश्यकः वह्निव्याप्यत्वावच्छिन्नाभाववदवृत्तित्वरूपविरोधानवच्छिन्नत्वमात्रस्य सांसर्गिकविषयतायां
निवेशे च वह्निव्याप्यधूमवान्न वेत्येतादृशसंशयवारणसंभवात् तत्र वह्निव्याप्यत्वावच्छिन्नाभावस्याकोटितया
तदधिकरणावृत्तित्वरूपविरोधस्याभानादिति वाच्यं। वह्निव्याप्यप्रतियोगिताकाभावावच्छिन्नाधिकरणनिष्ठा
वच्छेदकतानिरूपिताधेयत्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकताकत्वेन निखिलविरोधनिष्ठावच्छे
दकतामनुगमय्य तन्निरूपितत्वस्यैव संसर्गविषयतायां निवेशेनानुपपत्यभावात्। न चैवं वह्निव्याप्यालोका
भावाधिकरणावृत्तित्वावच्छिन्नसंयोगादिसांसर्गिकधूमादिनिश्चयासंग्रह इति वाच्यं। धूमवत्त्वज्ञाने आलो

काभाववदवृत्तित्वादेः संसर्गतयाभानेमानाभावादित्याहुः। तदप्यसत्। विरोधानवच्छिन्नसंयोगादिनिष्ठसांसर्गि
कविषयताकत्वस्यनिवेशेपियत्रसंशयेऽभावकोटावेवसंसर्गघटकतयाविरोधस्यभानंनतुधूमादेस्तादृशसंश
यवारणासंभवात्। नचसर्वत्रैवसंशयेउभयकोटिसंसर्गांशएवविरोधोभासतइतिवाच्यं। विरोधावच्छिन्नसंयो
गादिनिष्ठसंसर्गताकबुद्धिप्रतिबंधकविशिष्टसंयोगादिसंसर्गावच्छिन्नप्रतियोगिताकधूमाद्यभावावगाहिबाधा
दिकालीनसंशयेविरोधावच्छिन्नसंयोगादिनाधूमभानासंभवात्। नचतदानींसंशयएवनोत्पद्यतइतिवाच्यं। शु
द्धसंयोगविरोधावच्छिन्नविशेषणताभ्यांधूमतदभावकोटिकसंशयोत्पत्तौबाधकाभावात्। एवंविरोधावच्छिन्नसं
योगादिसंसर्गकप्रत्यक्षस्यशुद्धसंयोगादिपर्याप्तसांसर्गिकविषयताशालित्वेपिबाधकाभावः। तादृशविषयता
नियामकबाधाभावादिघटितसामग्र्याअपितदव्यवहितप्राक्कालेसत्वात्। एवंचसंशयस्यापिविरोधानवच्छिन्नसं
योगादिनिष्ठसांसर्गिकविषयताशालितयोपदर्शितप्रणाल्यापिसंशयव्यावर्त्तनमसाध्यं। नचशुद्धसंयोगादिप

र्यापिसांसर्गिकविषयताशालिबुद्धिंप्रतिविरोधावच्छिन्नसंयोगादिसंसर्गकबुद्धिसामग्र्याःप्रतिबंधकत्वंकल्पयित्वा
संशयस्यतादृशविषयताशालित्वंवारणीयमितिवाच्यं।तथाविधानंतसामग्र्याःप्रतिबंधकत्वकल्पनेमहागौरवात्।
एवंविरोधस्यसंसर्गतयाभानेपिन्ह्यसांविवादः।नचसंशयस्यसमुच्चयवैलक्षण्योपपत्तयेतत्रावश्यंविरोधविष
यत्वमंगीकरणीयं तत्रविरोधानुपस्थितिकालीनसंशयेविरोधस्यप्रकारतयाभानंनसंभवतिविशेषणज्ञानविर
हात्।अतःपरिशेषाद्विरोधस्यसंसर्गतासिद्धिरितिवाच्यं।तथाविधविरोधानुपस्थितिदशायांसंशयस्याप्रामाणिकतया
विरोधस्यप्रकारतामुपगम्यैवसंशयसमुच्चययोर्वैलक्षण्योपपादनसंभवात्।नचधूमालोकादिपरामर्शसाधारण
निर्णयत्वनिर्वचनान्यथानुपपत्त्याविरोधस्यसंसर्गताकल्प्यतइतिवाच्यं।तदकल्पनेपिपरामर्शस्यहेतुतावच्छेदक
भेदेनानुमितिहेतुतासंभवात्तदनुपपत्तेरकिंचित्करत्वात्।नचैवंसतिकार्यकारणभावानंत्यप्रसंगेनगौरवमिति
लाघवात्तत्सिद्धिरितिवाच्यं।कार्यकारणभावलाघवात्तद्विषयतासिद्धेःप्रतिबंधिसहस्रकवलितत्वादित्यलमस

10

क्रहेतुता। एवं हेतुतावच्छेदकविशेषघटितधूमाभाववद्विशेष्यतानिरूपितधूमप्रकारित्वादिरूपनानाविधाप्रामाण्य
ग्रहाभावानां पृथक्स्य धर्म्मिनिवेशानुरोधेनापि धूमत्वादिभेदेन परामर्शहेतुताभेद आवश्यकः। निखिलपरामर्शानामे
कहेतुत्वे तथाविधनिखिलाप्रामाण्यग्रहाभावानामेकत्रनिवेशाप्रसंगात् आलोकाभाववद्विशेष्यतानिरूपितालो
कप्रकारित्वादिप्रकारकग्रहकालेपि धूमादिपरामर्शादनुमित्यनुदयप्रसंगात्। न चाप्रामाण्यग्रहाभावानामनुमि
तिजनकतावच्छेदकत्वाएवेयमनुपपत्तिर्न तु तेषां पृथक्कारणत्वमत इति तन्मतमेवावलंबनीयमिति वाच्यं। अप्रामाण्य तु
ग्रहाभावस्य हेतुत्वमतेपि हेतुतावच्छेदकभेदेन परामर्शहेतुताभेदस्यावश्यकत्वात्। अर्थान्ये धूमाभाववति धूमप्रका ४
रकत्वरूपभ्रमत्वग्रहकाले धूमपरामर्शादनुमित्यापत्तेः संभवात् तथाहि तन्मते आलोकादिपरामर्शकाले धूमाभा
ववति धूमप्रकारकत्वादिरूपाप्रामाण्यग्रहकालेप्यनुमित्युत्पादप्रयोजिकाया अन्यविधाप्रामाण्यग्रहाभावव राम
द्विव्याप्यत्वावच्छिन्नप्रकारकनिश्चयत्वावच्छिन्नप्रभृतिकारणस्तोमघटितासामग्रीसाप्रकृते पक्षतेति। आलो ॥१०॥

कपरामर्शत्वस्यजनकतानवच्छेदकतयातदवच्छिन्नविरहस्यकारणतावच्छेदकावच्छिन्नकारणस्तोमात्मकसामग्री
विरहासंपादकत्वादिति। अथधूमप्रकारकत्वादिघटिताप्रामाण्यग्रहाणांस्वीयधूमाभाववद्विशेष्यतानिरूपित
त्वप्रकारतानिरूपितविशेष्यतावच्छेदकधूमप्रकारितात्वादिसंबंधावच्छिन्नप्रतियोगिताकाभावाअनुमितिजनक
तावच्छेदकीभूतव्याप्यप्रकारितायांनिवेश्यंते। तथाचतावदभावकूटविशिष्टव्याप्यप्रकारताशालिनिर्णयत्वेन
एकहेतुताकल्पनेपिनानुपपत्तिः। धूमपरामर्शदशायामालोकाभाववत्यालोकप्रकारकत्वादिरूपाप्रामाण्य
ग्रहसत्वेपितदीयव्याप्यप्रकारतायांतदीयालोकाभाववद्विशेष्यतानिरूपितत्वनिष्ठप्रकारतानिरूपितविशे
ष्यतावच्छेदकीभूतालोकप्रकारतात्वादिसंबंधेनतत्रासत्वात् उपदर्शिताप्रामाण्यग्रहाभावकूटस्यतत्राक्षतत्वा
दितिचेन्न। एवंसतितादृशाभावकूटस्यविशेष्यविशेषणभावेविनिगमनाविरहेणानंतकारणताप्रसंगात्
अवच्छेदकगौरवाच्चेतिप्रत्येकाभावंनिवेश्यधूमपरामर्शत्वादिनाहेतुताकल्पनमेवतदपेक्षयोचितं। नचता

वतामभावानांयद्येकाभावांशेविशेषणतयाऽपराभावोनिवेश्यतेतदेवविपर्यासक्रमेणनिवेशोपिविनिगम
तथा सति २ नाविरहात्प्रसज्येततदेवनैकाभावेऽपराभावस्यसामानाधिकरण्येनैववैशिष्ट्यस्यनिवेशनीयतयासंबंधगौ
रवात्परंतुसर्वेषामेवाभावानांविशेषणताविशेषसंबंधेनप्रकारताविशेषणत्वमुपगंतव्यमितिनदोषइतिवाच्यं
॥ प्रकारितानिष्ठकारणतावच्छेदकतायांतावतामभावानांमवच्छेदकत्वंनसंभवतितथासत्यवच्छेदकतावच्छेदकभेदेना
वच्छेदकतायास्तद्भेदेनचकारणताभेदप्रसंगात्कारणतायास्तदवच्छेदकतायाश्चैक्यस्यैवानुपपत्तेः।अवच्छेदकता
याव्यासज्यवृत्तित्वस्यान्यत्रदूषितत्वात्तावदभावेषुव्यासज्यवृत्तिमेकांकारणतावच्छेदकतामुपगम्यकारणत्वतदव वच्छेदकता ६
च्छेदकत्वैक्योपपादनप्रकारस्यहेयत्वात्।तस्मात्तादृशप्रकारतानिष्ठकारणतावच्छेदकतायामेकैकाभावोवच्छेदकस्तन्निष्ठ
तादृशावच्छेदकतायांचसामानाधिकरण्यसंबंधेनापराभावोवच्छेदकइत्येवरीतिरादरणीयातत्रचविशेष्यविशेषणभा राम
वविपर्यासक्रमेणनिवेशनमादायविनिगमनाविरहोब्रह्मणोपिदुर्वारः।नचनिखिलानांधूमालोकप्रकारत्वादिघटि ॥१३॥

ताप्रामाण्यग्रहाणां किंचिद्धर्मावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितप्रकारित्वनिष्ठवि
शेष्यतानिरूपितनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतावच्छेदकधर्मावच्छिन्नत्वसंबंधावच्छिन्नज्ञानत्वावच्छिन्न
प्रतियोगिताकएकएवाभावोव्याप्यप्रकारतायांनिवेश्यतइतिनविनिगमनाविरहप्रयुक्तगौरवावकाशइति
वाच्यं।तथासतिआलोकाभाववतिधूमप्रकारकमिदंज्ञानमित्येतादृशज्ञानदशायांवह्निव्याप्यधूमवान्पर्वतइ
त्येतादृशपरामर्शादनुमित्यनुदयप्रसंगात्तदानीं तादृशज्ञानस्यउपदर्शितसंबंधेनतादृशधूमप्रकारितायां
सत्वेनतादृशसंबंधावच्छिन्नज्ञानत्वावच्छिन्नप्रतियोगिताकाभावस्यासत्वात्: तादृशविशेष्यतावच्छेदकतावच्छे
दकधर्मावच्छिन्नत्वंस्वीयप्रकारित्वनिष्ठविशेष्यतानिरूपितनिरूपितत्वप्रकारतानिरूपितविशेष्यत्वप्रकार
तानिरूपिताधिकरणप्रकारतानिरूपिताभावप्रकारतानिरूपितप्रतियोगिप्रकारतावच्छेदकधर्मावच्छिन्न
त्वमधिकंनिवेश्यतत्रानुमित्युपपादनेपिधूमाभाववत्यालोकप्रकारकमालोकाभाववतिधूमप्रकारकंचे

दृंज्ञानमित्येतादृशज्ञानकालेतादृशपरामर्शादनुमित्युपपादनसंभवात्।धूमत्वस्यतज्ज्ञानीयतथाविधप्र
सिद्धोगिप्रकारतावच्छेदकत्वात्तदीयतादृशप्रकारितानिष्ठविशेष्यतावच्छेदकतावच्छेदकत्वाच्चेति।एवंधूमालो
कादिपरामर्शाभावेकरूपेणहेतुत्वेसिद्धिकालेधूमलिंगकेच्छासत्वेसत्तिचालोकादिपरामर्शेधूमलिंगकपराम
र्शविनैवधूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावबलादनुमित्यापत्तिः।नचैतन्मतेधूमलिंगकेच्छाविरहविशि
ष्टसिद्ध्यभावेनफलजननेधूमपरामर्शत्वावच्छिन्नस्यसहकारित्वंसंभवतिधूमपरामर्शत्वादीनामनुमि
तिजनकतानवच्छेदकत्वात्किंतुजनकतावच्छेदकीभूतवह्निव्याप्यवत्तानिर्णयित्वावच्छिन्नस्यैवतत्सहकारि
तथानोक्तापत्तिर्वारयितुंशक्यतेतथाभूतस्यालोकपरामर्शस्यैवसत्वात्।तस्माद्धूमादिलिंगकानुमिति
त्वावच्छिन्नंप्रतिधूमादिलिंगकपरामर्शत्वेनाविशिष्यहेतुत्वकल्पनमावश्यकमेव।अथधूमादिलिंगकानुमि
तित्वावच्छिन्नंप्रतिधूमादिलिंगकेच्छाविरहविशिष्टसिद्ध्यभावत्वेनहेतुतानसंभवति।धूमालोकोभयादिवि

षयकसमूहालंबनंपरामर्शजन्यायामालोकादिलिंगकेछाधीनानुमितौव्यभिचारप्रसंगात्। अपितुसामा
न्यतःपर्वतत्वावच्छिन्नपक्षकवह्न्याद्यनुमितौतत्तल्लिंगकपरामर्शविशिष्टतत्तल्लिंगकेछाविरहविशिष्टतथाविधसि
ध्यभावत्वेनैकमेवहेतुत्वंकल्पनीयं। एवंचकेवलधूमलिंगकेछासत्वेपिधूमलिंगकपरामर्शविशिष्टधूमलिंगके
छारूपोत्तेजकविरहेणविशिष्टाभावासत्वान्नानुमित्यापत्तिरितिचेन्न। तत्तल्लिंगकेछाविरहविशिष्टसिध्यभा
वजन्यतावच्छेदककोटौतत्तल्लिंगकेछाविरहविशिष्टसिद्धिविशिष्टान्यत्वनिवेशनैवोक्तसमूहालंबनपरामर्शज
न्यानुमितौव्यभिचारवारणसंभवात्। तत्तल्लिंगकपरामर्शविशिष्टतल्लिंगकेछाभावकूटनिवेशस्यासिद्धिप्रतिबं न
धकत्वकल्पनेप्रयोजनविरहात्। नचतत्तल्लिंगकानुमित्साविरहविशिष्टसिध्यभावत्वेनहेतुत्वेपक्षतायाःपरा
मर्शस्यचलिंगभेदेनकारणताबाहुल्यात्गौरवमिति तदपेक्षयातादृशाभावकूटविशिष्टसिध्यभावत्वादिना
एकहेतुताकल्पनमेवोचितमितिवाच्यं। अभावकूटस्यैकत्वानिवेशेविशेष्यविशेषणभावेविनिगमनाविर

13

हेतुकार्यकारणभावानंत्यप्रसंगात्तदवच्छेदकगौरवाच्चेति लिंगभेदेन पक्षतापरामर्शयोः कारणताकल्प
नस्यैवोचितत्वात्। एवं हेतुतावच्छेदकविषयतामनिवेश्य साध्यव्याप्यत्वावच्छिन्नप्रकारताशालिनिर्णयत्वेन हे
तुत्वे व्यभिचारस्य हेत्वाभासत्वानुपपत्तिः निर्द्धर्मितावच्छेदकव्याप्तिग्रहस्य व्यभिचारज्ञानाप्रतिबध्यतया व्य
भिचारज्ञानकालेपि साध्याभाववदवृत्तिमान्पक्षइत्येतादृशपरामर्षस्य व्याप्यंशे निर्द्धर्मितावच्छेदकस्यासत्त्वे
बाधकाभावेनानुमित्यापत्तेरावश्यकत्वात्। यत्तु सधर्मितावच्छेदकव्याप्तिज्ञानस्यानुमितिहेतुतया तद्विरो
धितयैव व्यभिचारस्य हेत्वाभासत्वोपपत्तिरिति। तन्न। अनुमितिकारणीभूतयत्किंचिज्ज्ञानविरोधिन एव हे
त्वाभासत्वे धूमलिंगकानुमितौ तज्जनकीभूतसमूहालंबनपरामर्शाविरोधिनो द्रव्यत्वनिष्ठवह्निव्यभिचारस्यापि
ध॰ तथात्वापत्तेः। तथाच तद्विषयकज्ञानप्रयुक्तानुमित्यनुत्पादः क्वाचित्कस एव हेत्वाभासः। नचैवं व्यभिचारो भवन्म राम
तेतज्ज्ञानसत्त्वेपि हेतुतावच्छेदकानवगाहिपरामर्शात्तस्याऽनुमित्युत्पादस्यावश्यकतया तज्ज्ञानस्याऽनुमित्य ॥९३॥

नादा२

नुत्पादप्रयोजकत्वविरहादिति॥ यत्तुसाध्यव्यभिचारीहेतुरिति व्यभिचारज्ञानकाले साध्यव्याप्यहेतुव्याप्यवान्पक्ष
इत्येतादृशनिर्णयस्य घटाद्यनुमितिसामग्र्याश्च सत्वेनुमित्यनुत्पादे व्यभिचारधीप्रयुक्तः। तथा हि तत्र यदि व्यभि
चारधीर्नस्यात्साध्यव्याप्यहेतुमान्पक्ष इत्येतादृशानुमानिकपरामर्शोत्पत्त्याऽनुमितिः स्यादेवसास्ती। तेन तथा
विधानुमानिकपरामर्शो जायते तत्र च तस्याः विरोधित्वात्। व्याप्यंशे निर्द्धर्मितावच्छेदकप्रात्यक्षिकपरामर्शस्तु
भिन्नविषयकानुमितिसामग्रीरूपप्रतिबंधकसत्वान्नोत्पद्यत इति। तन्नानुमित्यनुत्पादे व्यभिचारधीरपि प्रयो
जिकेति। तदसत्। एतादृशरीत्या पर्वतो वह्निमानित्यादावपि पर्वतादिनिष्ठघटाभाववत्त्वादेरपि दोषत्वप्रसंगा
त्। तथा हि यत्र वह्निव्याप्यधूमवान्पर्वतो घटव्याप्यवांनित्याकारकसमूहालंबनात्मकः परामर्शोस्ति च घटाभाव
वानित्येतादृशनिर्णयः भूतलं घटवदित्याद्यनुमितिसामग्री च तत्र यदि घटाभाववान्पर्वत इत्येतादृशनि
र्णयो न स्यात्तत्तदा वह्निव्याप्यधूमवान्पर्वतो घटवानित्येतादृशानुमानिकनिर्णयोत्पत्त्या पर्वतो वह्निमानि

(नजक्रिमा२)

14

त्येतादृशानुमितिःस्यादेव।सोस्तीतिनतादृशानुमानिकनिर्णयउत्पद्यतेवह्निव्याप्यधूमवान्पर्वतइत्येता
दृशप्रात्यक्षिकपरामर्शश्चभिन्नविषयकानुमितिसामग्रीरूपप्रतिबंधकसत्वान्नोत्पद्यतेतस्तत्रैववह्न्यनुमितिरु तेऽ२नर
त्पद्यतेतस्तत्रतदनुत्पादेघटाभाववान्पर्वतइत्येतादृशनिर्णयस्यापिप्रयोजकत्वमितितस्मात्तादृशरीत्याप्रयो
जकत्वंनहेत्वाभाससतासंपादकमितिनकिंचिदेतत्।।अत्रेदंसमाधीयते।।हेतुतावच्छेदकधर्मविशिष्यानिवे
श्यापितन्निर्वचनंसुवचमितिनतन्निर्वचनान्यथानुपपत्याविशिष्यहेतुतावच्छेदकानिवेशः।तथाहि।स्वावच्छिन्न
प्रतियोगिताकभेदवत्वव्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्य
ताकत्वोभयसंबंधेनकिंचिद्धर्मविशिष्टत्वमेवव्याप्यवत्तानिर्णयत्वमनुमित्याद्युपयोगिस्वावच्छिन्नप्रतियोगि
ताकत्वंचस्वनिष्ठायास्वावच्छिन्नप्रतियोगिताकाभावप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताक राम
त्वसंबंधावच्छिन्नप्रतियोगितावच्छेदकतातन्निरूपकत्वंधूमत्वावच्छिन्नाभावादिकोटिकोवह्निव्याप्यधूमवान्न ॥१४॥

वेत्यादिसंशयश्च नैतादृशोभयसंबंधेन केनापि धर्मेण विशिष्टः धूमत्वान्यधर्मस्य तत्र व्याप्तिप्रकारतानिरूपितस्वा
वच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधेनासत्वा। धूमत्वस्य तादृशसंबंधावच्छिन्नप्रति
भेद ३ योगितावच्छेदकताकसंबंधेनासत्वात्। तथाहि यदि तादृशसंबंधावच्छिन्नधूमत्वनिष्ठप्रतियोगितावच्छेदकताकभेद
स्तत्र वर्त्तेत तदेव तत्र धूमत्वं तादृशाभेदसंबंधेन स्यात्। न चैतादृशप्रतियोगितावच्छेदकताघटकसंबंधेन धूमत्वरू
पप्रतियोगितावच्छेदकविशिष्टे तादृशाभेदो वर्त्तितुमीष्टइति। वह्निव्याप्यधूमवान्पर्वत इत्येतादृशनिर्णयानांच तादृ
शोभयसंबंधेन धूमत्वादिरूपहेतुतावच्छेदकधर्मवत्त्वमक्षतमेव। तादृशाभेदप्रतियोगितावच्छेदकताघटकसंबं
धघटकपक्षविशेष्यतानिष्ठस्वावच्छिन्नप्रतियोगिताकाभावप्रकारतानिरूपितत्वं च स्वनिरूपकप्रकारतानिरू
पितत्वसंबंधेन साध्यव्याप्यत्वनिष्ठावच्छेदकतान्यावच्छेदकताविशिष्टा व्याप्याः स्वनिष्ठावच्छेदकतातन्निरूपकीभूत
प्रतियोगिप्रकारतानिरूपिताभावप्रकारतानिरूपितत्वं। यथाश्रुते नीलधूमाभाववान्पर्वतो वह्निव्याप्यधूम

15

वह्निश्चेत्येतादृशनिश्चयासंग्रहात्। विशिष्टधूमत्वस्य धूमत्वानतिरिक्ततया नीलधूमत्वावच्छिन्नाभावस्य धूम
त्वावच्छिन्नाभावत्वात्। धूमत्वावच्छिन्नाभावप्रकारतानिवेशे धूमाभावत्वादिनाभावांशावगाहिसंशय
वारणासंभवात्। यथाविवक्षिते तु न दोषः। उपदर्शितनिश्चयीयाभावविषयतानिरूपितधूमप्रकारतानिरूपित
धूमत्वनिष्ठावच्छेदकतायाः स्वनिरूपकप्रकारतानिरूपितत्वसंबंधेन नीलनिष्ठावच्छेदकताविशिष्टत्वात्। ताद
तावच्छेदकतायाः साध्यव्याप्यत्वनिष्ठावच्छेदकताभिन्नत्वनिवेशाद्यत्र संशये वह्निव्याप्यधूमत्वादिना तादृशध
र्मादिरभावप्रतियोगितयाभातस्तादृशसंशयवारणं। तत्र धूमत्वादिनिष्ठतादृशावच्छेदकतायाः स्वनिरूपकप्र
८ कारतानिरूपितत्वसंबंधेन व्याप्तिनिष्ठावच्छेदकताविशिष्टत्वेपि तदन्यावच्छेदकताविशिष्टान्यत्वसत्त्वात्। न चैवम
पि जातिविशेषत्वादिना धूमत्वं यत्राभावविशेषणतापन्नधूमांशे विशेषणतयावगाहमानस्य जातिविशेषावच्छिन्ना राम
भाववान् वह्निव्याप्यधूमवान् पर्वत इत्येतादृशनिर्णयस्यासंग्रह इति वाच्यं। तादृशावच्छेदकतायां निरवच्छिन्नत्वस्या ॥१५॥

प्तिनिवेशनीयत्वात्। अथैवं वह्निव्याप्यनीलधूमवान्नवा पर्वतो वह्निव्याप्यजातिविशेषवद्धान्नवा पर्वत इत्येता
दृशसंशयसाधारण्यं दुर्वारं। पूर्वज्ञानीयाभावविषयतानिरूपितधूमनिष्ठप्रकारतावच्छेदकतायाः स्वनिरूपक
प्रकारतानिरूपितत्वसंबंधेन नीलनिष्ठावच्छेदताविशिष्टतयोत्तरज्ञानीयतादृशप्रकारतावच्छेदकताया श्चासा
वच्छिन्नतया तादृशावच्छेदकताविशिष्टान्यनिरवच्छिन्नावच्छेदकताकप्रतियोगिप्रकारतानिरूपिताभावप्रकार
तानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधेन धूमत्वविशिष्टस्य तत्र भेदसत्वादिति चेन्न। तादृशो
भयसंबंधघटकीभूतचरमदलप्रविष्टस्वावच्छिन्नप्रकारतेत्यस्य स्वनिरूपकप्रकारतानिरूपितत्वसंबंधेन व्या
प्तिनिष्ठावच्छेदकताभिन्नावच्छेदकताविशिष्टान्यनिरवच्छिन्नस्वनिष्ठावच्छेदकताकप्रकारतेत्यर्थः। एवं च व्याप्ति
प्रकारतानिरूपिततादृशप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधेन तादृशसंशययो
धूमत्वविशिष्टत्वाभावात् न तादृशसंशयसाधारण्यप्रसंगः। अथैवं वह्निव्याप्यनीलधूमवान्पर्वतो वह्निव्याप्य

16

आप्तिविशेषवत्त्वान्यवंतद्व्यत्येतादृशनिर्णयासंग्रह इति चेत्काक्षतिः। तादृशनिर्णयानांभवन्मतइवास्मन्मतेपिपृ
थगेवहेतुतायाःस्वीकरणीयत्वात्। एवमपिस्वरूपतःशुद्धधूमत्वालोकत्वाद्यनंतधर्मधर्मितावच्छेदकव्याप्यवगा
हिपरामर्शानामननुगमसंभवेनलाघवस्याक्षतत्वात्। किंतुएतादृशनिर्णयत्वस्यहेतुतावच्छेदकानवगाहिव्याप्य
वत्तानिर्णयसाधारण्यंनघटतेतत्रोपदर्शितोभयसंबंधेनकस्यचिदपिधर्मस्यवैशिष्ट्याभावादिति। तदनुगुण
मेव-यतोहेतुतावच्छेदकानवगाहिज्ञानस्यानुमितिजनकत्वेव्यभिचारस्यहेत्वाभासतानस्यात्। इदानींतुतादृश
ज्ञानस्यानुमितिजनकत्वाभावात् हेतुतावच्छेदकावगाहिज्ञानप्रतिबंधकतयाव्यभिचारस्यहेत्वाभासतानाना
यासेनैवोपपन्नेति। एवमप्रामाण्यग्रहाभावनिवेशानुरोधेनापिनविशिष्यहेतुतावच्छेदकनिवेशः। धूमप्रका
रकत्वालोकप्रकारत्वादिनानाविधाप्रामाण्यग्रहाणामननुगतरूपावच्छिन्नप्रतियोगिताकैकाभावस्यैवनिवे राम
शसंभवात्। तथाहि-निखिलाप्रामाण्यप्रकारताःस्वावच्छिन्नाभाववद्विशेष्यकत्वावच्छिन्नत्वप्रकारतानिरूपि ११३६।

तत्वस्यावछिन्ननिरूपितत्वसंबंधावछिन्नअवछेदकताकत्वोभयसंबंधेन किंचिद्धर्मविशिष्टप्रकारित्वप्र
कारितात्वेनानुगमयत्नीय ताहशप्रकारतानिरूपितनिरूपितत्वसंबंधावछिन्नावछेदकतावछेदकधर्मावछिन्न
त्वसंबंधावछिन्नज्ञानत्वावछिन्नप्रतियोगिताकाभावविशिष्टायाव्याप्यत्वावछिन्नप्रकारतातन्निरूपितपक्ष
तावछेदकावछिन्नविशेष्यताकनिर्णयत्वेनैव परामर्शस्यहेतुतोपगम्यते। वह्निव्याप्यधूमवान्पर्वतइत्येताहशप
रामर्शदशायांधूमाभाववतिधूमप्रकारकमित्येताहशाप्रामाण्यग्रहसत्वे ताहशपरामर्शीयव्याप्तिप्रकारता
यांनोपदर्शितसंबंधावछिन्नज्ञानत्वावछिन्नप्रतियोगिताकाभावोवर्त्तते। तत्रोभयसंबंधेन धूमत्वविशिष्टा
यास्ताहशाप्रामाण्यज्ञानीयधूमप्रकारित्वप्रकारतातदवछेदकतावछेदकीभूतधूमत्वावछिन्नत्वसत्वात्।।
ताहशसंबंधेनतत्रज्ञानत्वावछिन्नस्याप्रामाण्यज्ञानस्यैवसत्वात्‌ः अतोनतत्रानुमितिप्रसंगः। आलोका
भाववतिआलोकप्रकारकंआलोकाभाववतिधूमप्रकारकमित्यादिग्रहदशायांचनताहशादनुमित्यनुपप

त्रिः।तादृशपरामर्शीयधूमप्रकारतायाम्आलोकाभाववतिआलोकप्रकारकमित्येतादृशज्ञानीयप्रकारित्वप्र
कारतानिरूपितावच्छेदकतावच्छेदकीभूतालोकत्वावच्छिन्नत्वविरहात्।आलोकाभाववतिधूमप्रकारकमि
त्येतादृशज्ञानीयधूमप्रकारित्वप्रकारतावच्छेदकतावच्छेदकावच्छिन्नत्वसत्वेपितादृशधूमप्रकारित्वप्रकारता
याउपदर्शितोभयसंबंधेनकेनापिधर्मेणअविशिष्टत्वात्।स्वावच्छिन्नाभाववद्विशेष्यकत्वावच्छिन्नत्वप्रका
रतानिरूपितत्वंच स्वनिरूपकप्रकारतानिरूपितत्वसंबंधेन साध्यव्याप्यत्वनिष्ठावच्छेदकताभिन्नावच्छेदक
ताविशिष्टंयत्तदन्यस्वनिष्ठावच्छेदकतानिरूपकप्रतियोगितासंसर्गावच्छिन्नप्रकारतानिरूपिताभावप्रकारता
निरूपिताधिकरणप्रकारतानिरूपितविशेष्यत्वप्रकारतानिरूपकतावच्छिन्नप्रकारतानिरूपितत्वं।यथा।ह्रते
नीलधूमाभाववतिधूमप्रकारकमित्येतादृशज्ञानीयधूमप्रकारकत्वादिविषयतायाअपिउपदर्शितोभयसंबंधे
नधूमत्वादिविशिष्टत्वात्।तादृशज्ञानकालेधूमादिपरामर्शात्अनुमित्यनुदयापत्तेः।इदानींतुतादृशज्ञानीयधू

मत्वादिनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकतायाः स्वनिरूपकप्रकारतानिरूपितत्वसंबंधेन नी
लादिनिष्ठावच्छेदकताविशिष्टत्वात्। तादृशसंबंधेन अवच्छेदकताविशिष्टं यत्तदन्यस्वनिष्ठावच्छेदकताकप्रकारता
घटितोपदर्शितसंबंधेन तादृशज्ञानीयप्रकारित्वविषयतायां न धूमत्वादिविशिष्टत्वमिति नानुपपत्तिः। भेदप्रति
योगितावच्छेदकीभूतावच्छेदकतायां साध्यव्याप्यत्वनिष्ठावच्छेदकताभिन्नत्वानिवेशात् वह्निव्याप्यधूमाभाववत्तिव
ह्निव्याप्यधूमप्रकारकमित्येतादृशज्ञानीयप्रकारित्वसंग्रहः। एवं सति वह्निव्याप्यधूमाभाववत्तिधूमप्रकारक
मित्येतादृशज्ञानीयप्रकारिताया अपि तूपदर्शितोभयसंबंधेन धूमत्वादिविशिष्टत्वात् तादृशज्ञानकाले अनुमि
त्यनुत्पत्तिः। तादृशज्ञानस्य नीलधूमाभाववत्तिधूमप्रकारकमित्येतादृशज्ञानसमशीलतया अप्रामाण्यज्ञा
ना० २ नात्मकतया इष्टापत्तेरयोगादिति चेत्॥ तादृशस्थले ऽनुमित्युत्पादस्य प्रामाणिकत्वे स्वावच्छिन्ननिरूपितत्व
संबंधावच्छिन्नावच्छेदकताकेत्यत्र स्वावच्छिन्नावच्छेदकतायां साध्यव्याप्यत्वावच्छिन्नत्वमपि निवेशनीयं। व्या

18

प्यत्वाविषयकाणां धूमाभाववति धूमप्रकारकमित्यप्रामाण्यग्रहाणां च पृथगेवाभावो निवेशनीयः। तत्र च
प्रतियोगितावच्छेदकीभूतावच्छेदकतायां साध्यव्याप्यत्वनिष्ठावच्छेदकताभिन्नत्वमनिवेश्य सामान्यतोऽवच्छेदकता
विशिष्टान्यत्वमेव स्वनिष्ठावच्छेदकतायां निवेशनीयं। स्वावच्छिन्ननिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकत्वेत्यत्रा
स्वं पि अवच्छेदकतायां साध्यव्याप्यत्वावच्छिन्नत्वं न निवेशनीयमिति। जातिविशेषवदभाववति धूमप्रकारकमित्येता
दृशज्ञानकाले धूमादिपरामर्शादनुमित्युपपत्तये स्वनिष्ठावच्छेदकतायां निरवच्छिन्नत्वमपि निवेशनीयम्। वह्निव्या
प्यनीलधूमवान्पर्वत इत्याकारकपरामर्शान्नीलधूमाभाववति नीलधूमप्रकारकमित्येतादृशाप्रामाण्यग्रह
सत्त्वे वह्निव्याप्यजातिविशेषवत्वान्पर्वत इत्येतादृशपरामर्शाज्जातिविशेषवदभाववति जातिविशेषवत्प्रकारक
मित्येतादृशाप्रामाण्यग्रहसत्त्वेऽनुमित्यापत्तिरिति तु नाशंकनीयं। एवं पक्षधर्मितवह्निव्याप्यनीलधूमवान्नवाप
र्वतः वह्निव्याप्यजातिविशेषवत्वान्नवापर्वत इत्येतादृशसंशयादनुमित्यापत्तिवारणाय वर्त्मने नात्राप्यनुमित्याप

त्तिवारणात्। एकपुरुषीयाप्रामाण्यग्रहसत्त्वे पुरुषांतरस्याप्यनुमित्यनुत्पादप्रसंगः इति तत्पुरुषीयानुमितिं प्रति
तत्पुरुषीयाप्रामाण्यग्रहाभावविशिष्टव्याप्यप्रकारताशालिपरामर्शत्वेन हेतुता वक्तव्येति पुरुषभेदेनानंतका
र्यकारणताप्रसंगः इति चेन्न। एवमपि हेतुतावच्छेदकरूपविषयाणां पुरुषापेक्षया बहुतरतया व्यापकसामानाधि
करण्यज्ञानहेतुतामतापेक्षया लाघवस्य दुरपह्नवत्वात्। स्यादेतत्। एवमपि उपदर्शितोभयसंबंधेन किंचिद्धर्मवि
शिष्टयास्वीयप्रकारित्वप्रकारतातदवच्छेदकतावच्छेदकधर्मावच्छिन्नत्वसंबंधेनाप्रामाण्यग्रहाभावस्य व्याप्य
प्रकारतायां निवेशे प्रथमधूमपरामर्शे इदं ज्ञानं धूमाभाववति धूमप्रकारकमित्याकारकाप्रामाण्यग्रहसत्त्वे
धूमादिपरामर्शांतरादपि अनुमित्यनुदयप्रसंगो दुर्वार एव। तदीयव्याप्यप्रकारतायामपि उपदर्शितसंबंधेन तत्ता
दृशाप्रामाण्यग्रहसत्त्वात्। अतो विशेष्यतासंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्यैव परामर्शे वि का२
शेषणत्वमुपगंतव्यं। तथा च हेतुतावच्छेदकनिवेशनमावश्यकमेव। न च तादृशप्रकारित्वप्रकारतावच्छेदकता

वच्छेदकधर्मावच्छिन्नत्वतादृशप्रकारित्वप्रकारतानिरूपितविशेष्यताश्रयज्ञाननिरूपितत्वोभयसंबंधेनैवज्ञा
नत्वावच्छिन्नाभावो निवेशनीयः। उक्तस्थले च द्वितीयपरामर्शीयधूमप्रकारतायां तादृशप्रामाण्यज्ञानीयतथा
विधप्रकारित्वप्रकारितावच्छेदकतावच्छेदकावच्छिन्नसत्वेपि स्वीयतादृशप्रकारित्वप्रकारतानिरूपितविशेष्य
ताश्रयप्रथमपरामर्शनिरूपितत्वाभावात् उक्तोभयसंबंधावच्छिन्नज्ञानत्वावच्छिन्नप्रतियोगिताकाभावोऽक्ष
त एवेति नानुपपत्तिरिति वाच्यं। एवमपि यत्र प्रथमं धूमपरामर्शानंतरं इदं ज्ञानं धूमाभाववति धूमप्रकारकं
भाविज्ञानं आलोकाभाववति आलोकप्रकारकमित्याकारकोभयपरामर्शविशेष्यकसमूहालंबनाप्रामा
ण्यग्रहः तदुत्तरं च द्वितीयो धूमपरामर्शः तदनंतरमनुमित्यनुपपत्तेर्दुर्वारत्वात्। तत्र द्वितीयधूमपरामर्शी
यधूमप्रकारतायास्तादृशाप्रामाण्यज्ञानीयतथाविधधूमप्रकारित्वप्रकारतावच्छेदकतावच्छेदकधूमत्वा
वच्छिन्नत्वात् तदीयतथाविधालोकप्रकारित्वप्रकारतानिरूपितविशेष्यताश्रयाद्वितीयपरामर्शानिरूपित

त्वाद्युक्तोभयसंबंधेन तत्र तादृशप्रामाण्यग्रहस्यैवसत्वात्। यदि च स्वावच्छेदकतावच्छेदकधर्मावच्छिन्नत्व
स्वनिरूपितविशेष्यताश्रयज्ञाननिरूपितत्वोभयसंबंधेन ज्ञानीयतथाविधप्रकारित्वप्रकारतायाएवाभावो
व्याप्यप्रकारतायां निवेश्यते। उपदर्शितसमूहालंबनाप्रामाण्यज्ञानीययत्प्रकारित्वप्रकारतावच्छेदकतावच्छेदका
वच्छिन्नत्वं द्वितीयपरामर्शीयधूमप्रकारतायां न तन्निरूपितविशेष्यताश्रयज्ञाननिरूपितत्वमित्युक्तोभयसंबं
धेन तज्ज्ञानीयतथाविधप्रकारताभावोऽक्षतएवेति नानुपपत्तिरिति विभाव्यते। तथापि ज्ञानभेदेन विषयता
भेदानभ्युपगमे द्वितीयधूमपरामर्शीयधूमप्रकारतायाः तादृशोभयसंबंधेन तादृशप्रामाण्यज्ञानीयप्रकारि
त्वप्रकारताविशिष्टाया प्रथमपरामर्शीयधूमप्रकारतातदभिन्नत्वात्तन्न तत्र तादृशोभयसंबंधावच्छिन्नप्रतियो
गिताकतथाविधप्रकारित्वप्रकारताभाववत्त्वनिस्तार इति चेत्। मैवं। प्रथमपरामर्शे प्रामाण्यग्रहे तत्समाना
कारकात्परामर्शान्तरादपि तावदनुमितिर्नेष्यतएव यावन्न तस्य विनाश इति कदाचिदनुपपत्तिः॥ ॥अथ य

20

त्र वह्निव्याप्य धूमवान्पर्वतः वह्निव्याप्यालोकवान्नवा पर्वत इत्येतादृशसमूहालंबनानंतरं इदं ज्ञानं धूमाभाववति
धूमप्रकारकमित्याकारकाप्रामाण्यग्रहः तत्रानुमित्यापत्तिर्दुर्वारैव। तादृशपरामर्शस्योपदर्शितसंबंधावच्छिन्न
प्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टालोकप्रकारताशालित्वात्। निरुक्तस्वावच्छिन्नप्रतियोगिताकभेदव
त्त्वव्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वोभयसंबंधे
न धूमत्वविशिष्टतया निरुक्तस्य तादृशोभयसंबंधेन किंचिद्धर्मत्वविशिष्टत्वरूपनिर्णेयत्वस्यापि तत्र सत्त्वाच्चेति
चेत्सत्यं। तादृशसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टव्याप्यप्रकारतावत्त्व तथाविधनिर्ण
यत्वयोः स्वातंत्र्येण हेतुत्वेन वत्येवेयमनुपपत्तिः। तदेवतत्परं तूपदर्शितसंबंधेन किंचिद्धर्मविशिष्टत्वरूपनिर्णय
त्वशरीरस्य संबंधविधया घटकीभूतायां व्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारतात्रैव तादृशसंबंधावच्छि ॥ राम ॥२०॥
न्नप्रतियोगिताकज्ञानाभावो निवेश्यते। एवं च उक्तस्थले तादृशाप्रामाण्यग्रहाभावविशिष्टतथाविधस्वावच्छिन्न

प्रकारताघटितोभयसंबंधेन नकस्यापि धर्मस्य वैशिष्ट्यं तादृशसमूहालंबनपरामर्शे अस्ति। धूमत्वावच्छिन्नप्रका
रतायानिरूक्तसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टत्वाभावात् स्वपदेन धूमत्वोपादानस्य स्वा
वच्छिन्नप्रतियोगिताकाभावप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नस्वनिष्ठप्रतियो
गितावच्छेदकताकभेदवत्त्वरूपस्य स्वावच्छिन्नभेदवत्त्वदलस्य चालोकत्वनिरूपितस्य तादृशपरामर्शे सत्त्वेन स्वपदेना
लोकत्वोपादानस्याप्यसंभवात्। अतो न तत्रानुमित्यापत्तिरिति॥ ॥एवं सिद्धिकाले धूमलिंगकेच्छा आलोकलिंगकप
रामर्शकाले धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावबलात् अनुमित्यापत्तौ धूमपरामर्शत्वादिना हेतुताकल्पनमभि रितिर्न
प्तियदुक्तं तदपि न। धूमलिंगकानुमितित्वावच्छिन्नं प्रति धूमलिंगकेच्छाविरहसहकृतसिद्ध्यभावत्वादिना पक्षता न्र
हेतुत्वं। अपि तु सामान्यतः पर्वतत्वावच्छिन्नविशेष्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रति वह्निव्याप्यवत्तानिर्ण
यविशिष्टपर्वतत्वावच्छिन्नविशेष्यतानिरूपितत्वावच्छिन्नविधेयताप्रकारताकानुमितिगोचरेच्छाविरहसहकृ भक्ति

तत्सिध्यभावत्वादिनाएकैकमेवहेतुत्वंकल्प्यते।तादृशपरामर्शविशिष्टंचस्वीयपर्वतत्वावच्छिन्नविशेष्यतानि
रूपितायाव्याप्तिप्रकारतानिरूपितप्रकारतातदवच्छेदकधर्मावच्छिन्नलिंगकत्वप्रकारकत्वस्वसामानाधिकरण्यो
भयसंबंधेन।धूमत्वादिमात्रावच्छिन्नलिंगकत्वप्रकारिकातादृशीइच्छाचनेतादृशोभयसंबंधेनालोकत्वाद्यवच्छि
न्नलिंगकपरामर्शविशिष्टाइतिनतथाविधेच्छाकालेसिद्धिसत्वेआलोकत्वाद्यवच्छिन्नलिंगकपरामर्शादनुमित्या
पत्तिः।तादृशपरामर्शविशिष्टेच्छारूपोत्तेजकविरहादितिधूमपरामर्शत्वादिनाहेतुत्वकल्पनंविनैवोपपत्तिरितिन
चैकत्रद्वयमितिरीत्याएकविशिष्टेऽपरवैशिष्ट्यमितिरीत्यावाधूमलिंगकत्वालोकलिंगकत्वोभयादिप्रकारकानु
मित्साविशिष्टसिद्धिकालेतथाविधैकमात्रलिंगकपरामर्शादनुमित्यापत्तिः।तादृशेच्छाअप्युपदर्शितोभयसंबं
धेनतथाविधपरामर्शादिविशिष्टत्वादितिविशिष्टधूमलिंगकानुमितित्वावच्छिन्नंप्रतिधूमान्यलिंगकत्वप्रकार राम
त्वानिरूपितानुमितिनिष्ठविशेष्यताकेच्छाविरहविशिष्टसिध्यभावत्वादिनाहेतुत्वकल्पनमावश्यकमितिवाच्यम्। ॥२७॥

स्यावच्छिन्नलिंगकत्वप्रकारतानिरूपितत्वस्यभिन्नधर्मावच्छिन्नलिंगकत्वप्रकारतानिरूपितत्वोभयसंबंधेनकिं
चिद्धर्मविशिष्टान्यायास्त्वीयव्याप्तिप्रकारतानिरूपितप्रकारतावच्छेदकधर्मावच्छिन्नलिंगकत्वप्रकारतानिरूपितानु
त३ मितिनिष्ठविशेष्यतौघ्निरूपकत्वस्वसमानाधिकरण्योभयसंबंधेनवपरामर्शवैशिष्टस्येच्छायांनिवेशनीयतया
उपदर्शितेच्छानिरूपितानुमितिनिष्ठविशेष्यतायाश्चोपदर्शितोभयसंबंधेनधूमत्वादिविशिष्टतयातादृशेच्छायांउक्त
संबंधेनपरामर्शवैशिष्ट्याभावेनापत्यभावात्इति।एवंचसाध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानहेतुतामतेहेतु
तावच्छेदकभेदेनपरामर्शहेतुतानुमितिसामग्रीप्रतिबंधकताभेदाभावप्रयुक्तलाघवमक्षतमेवेति।इदंपुनरि
हावधेयं॥ ॥यदिनिर्णयत्वनिर्वचनाद्यनुरोधेनापिनहेतुतावच्छेदकनिवेशस्यावश्यकतातदाव्यापकसामा
नाधिकरण्यज्ञानहेतुतायामपिविशिष्यहेतुतावच्छेदकमननिवेश्यसर्वमुपपादयितुमीशामहे॥तथाहि॥व्या
पकसामानाधिकरण्यरूपव्याप्त्यवगाहिपरामर्शस्यस्वावच्छिन्नव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्ननिरूपित

22

सामानाधिकरण्यावच्छिन्नायास्स्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधेन किं रू १
चिद्धर्मविशिष्टनिर्णयत्वेनैव हेतुता कल्प्यते। धूमव्यापकवह्निसामानाधिकरण्य धूमवानयं पर्वत इत्यादिपरामर्श
श्चैतादृशसंबंधेन धूमत्वादिविशिष्ट एव ततस्तस्मादनुमितिरुत्पद्यते। धूमव्यापकवह्निसामानाधिकरण्यालोक
वानयं पर्वत इत्यादिनिर्णयश्च न तादृशसंबंधेन केनापि धर्मेण विशिष्टः तादृशज्ञानीयपक्षविशेष्यतानिरूपिता
लोकत्वाद्यवच्छिन्नप्रकारतायां आलोकत्वाद्यवच्छिन्नव्यापकतावच्छेदकवह्नित्वावच्छिन्ननिरूपितसामानाधिक
रण्यावच्छिन्नत्वविरहात् स्वपदेनालोकत्वस्य धूमत्वावच्छिन्नत्वविरहाच्च स्वपदेन धूमत्वस्याप्युपादातुमशक्य
त्वादिति। स्वावच्छिन्नव्यापकतावच्छेदकवह्नित्वावच्छिन्ननिरूपितसामानाधिकरण्यावच्छिन्नेत्यस्य च स्वनिष्ठा
वच्छेदकतानिरूपकं यद्धेतुनिष्ठमवच्छेदकत्वं तन्निरूपकं यदधिकरणनिष्ठमवच्छेदकत्वं तन्निरूपकं यदाधेयत्वनि राम
ष्ठमवच्छेदकत्वं तन्निरूपकं यदभावनिष्ठमवच्छेदकत्वं तन्निरूपकं यद्वह्नित्वनिष्ठमवच्छेदकत्वं तन्निरूपकं यद्वह्निनिष्ठ ॥२२॥

यत्प्रतियोगितानिष्ठमवच्छेदकत्वं तन्निरूपकं यदवच्छेदकता
निष्ठमवच्छेदकत्व[illegible] तन्निरूपकं यदभावनिष्ठमव
च्छेदकत्वं तन्निरूपकं १

मवछेदकत्वं तन्निरूपकं यदधिकरणनिष्ठमवछेदकत्वं तन्निरूपकं यदाधेयत्वनिष्ठमवछेदकत्वं तन्निरूपकेत्यर्थः।
वास्तवताद्दशसामानाधिकरण्यविछिन्नत्वमात्रनिवेशे समानाधिकरणधूमवानित्यादिनिर्णयादनुमित्यापत्तेः। इं
धनव्यापकवह्निसमानाधिकरणेंधनवानित्यादिपरामर्शादनुमित्यनुदयापत्तेश्च। नीलधूमसमानाधिकरणाभा
वप्रतियोगितानवछेदकवह्नित्वावछिन्नसमानाधिकरणधूमवानित्यादिज्ञानवारणाय च स्वनिष्ठावछेदकत्वे
स्वनिरूपकावछेदकत्वानिरूपितत्वसंबंधेनावछेदकताविशिष्टान्यत्वं निवेश्यं। नीलधूमत्वावछिन्नलिंगकपरा
मर्शादीनां पृथगेव हेतुता वाच्या। साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानहेतुतावादिनापि तत्र स्वतंत्रहेतुतायाः
स्वहस्तितत्वात्। एवं जातिविशेषवत्समानाधिकरणाभावप्रतियोगितानवछेदकवह्नित्वावछिन्नसमानाधिकर
णधूमवान्पर्वत इत्यादिज्ञानवारणाय निरवछिन्नत्वं स्वनिष्ठावछेदकतायां निवेश्यं जातिविशेषत्वादिना धूमत्वा
का. दिहेतुतावछेदकस्थले पृथगेव हेतुत्वं भवतापि कल्पनीयं। भवतापि तत्र कारणतायाः स्वहस्तितत्वात्। एवं धूमसमा

नाधिकरणघटाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरण्यधूमवान्पर्वतइत्यादिज्ञानधारण्यआ
धेयत्वादिनिष्ठावच्छेदकतायामपिस्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेनाभावत्वान्यनिष्ठावच्छेदकता[illegible]विशि
ष्टान्यत्वंनिवेशनीयमिति। एवंसामग्रीप्रतिबंधकतायामपिहेतुतावच्छेदकेविशिष्यानिविश्योपदर्शितरूपेणाप
त रामर्शेनिवेशनीयसंभवात्सामग्रीप्रतिबंधकतघटकत्वमपिनास्ति। एवंचशरीरगौरवस्यप्रागेवप्रयोजकीकृतत्वा
त्व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानमेवानुमितिहेतुरिति निराबाधमेवविशेषदर्शिनामपिकेवलान्वय्यनु
मानमिति। स्यादेतत्। व्यापकसामानाधिकरण्यज्ञानस्यअनुमितिहेतुतामतेपर्वतोवह्निमानित्याकारिकास्वरू
पतोवह्नित्वादिरूपविधेयतावच्छेदकावगाह्यनुमितिर्दुरुपपादा। तथाहि। धूमसमानाधिकरण्याभावप्रतियोगि
तानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणवान्पर्वतइत्याकारकपरामर्शस्यैवैतन्मतेऽनुमितिहेतुतातस्माच्चव राम
ह्नित्वत्वादिनावह्नित्वाद्यवगाहिनीअनुमितिरेवभवितुमर्हति। परामर्शस्ययद्रूपावच्छिन्नेसाध्यतावच्छेदकेतादृश ॥२३२८

प्रतियोगितानवच्छेदकत्वैतत्वावगाहित्वं तद्रूपपुरस्कारेणैव साध्यतावच्छेदकावगाह्यनुमितिजनकत्वस्य चाभावस्या
वश्यमंगीकार्यत्वात्। अन्यथा तादृशप्रतियोगितानवच्छेदकज्ञानिमत्समानाधिकरणधूमवान्पर्वत इत्यादिपरामर्शा
दपि पर्वतो वह्निमानित्येतादृशानुमित्यापत्तिः। अथ ज्ञानित्वाद्यवच्छिन्नेतादृशप्रतियोगितानवच्छेदकत्वावगाहिपराम
र्शस्य ज्ञानित्वाद्यवच्छिन्नविधेयतावच्छेदकताकानुमितित्वमेव जन्यतावच्छेदकं अतो न तस्मात्स्वरूपतो वह्नित्वादि
विषयिण्यनुमितिः। वह्नित्वत्वावच्छिन्नप्रतियोगितानवच्छेदकत्वावगाहिनः परामर्शात्तादृशानुमितिः संभवत्येव। तादृ
शानुमितित्वस्यैव तथाविधपरामर्शजन्यतावच्छेदकत्वोपगमादिति चेत्। तर्हि पर्वतो वह्नित्ववह्निमानित्याकारकवह्नि
त्वत्वाद्यवच्छिन्नविधेयतावच्छेदकताकानुमितिलोपप्रसंगः॥ स्वरूपतो वह्नित्वादिविधेयतावच्छेदककानुमितित्वस्य ता ३
वतथाविधानुमितिजनकपरामर्शजन्यतावच्छेदकतायाः स्वीकृतत्वात्। अथ तथाविधानुमितित्वमपि तज्जन्यताव
च्छेदकमिति चेत्तर्हि पर्वतो वह्निमान्वह्नित्व च द्वांश्चेति द्विविधविषयताशालिन्यनुमितिरेवासति प्रतिबंधके नियम

२५

तः स्यात्। न तु कदाचित्केवलं पर्वतो वह्निमानित्याकारिका कदाचिद्वह्नित्ववद्वानित्याकारिकेति। एतच्चानुभवविरुद्धं।
साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानहेतुतामते च यत्र यत्राभावप्रतियोगितावच्छेदकतया स्वरूपतो वह्नित्वादेः
परामर्शे भासते तत्रानुमितावपि स्वरूपत एव भासते यत्र तु वह्नित्वत्वादिना तत्रानुमितौ तथैव नियमः संभवति। य
न४ त्र अवच्छेदकत्वांशे निर्धर्मितावच्छेदकपरामर्शः स्वरूपतो वह्नित्वादिविधेयतावच्छेदकानुमितौ हेतुः। वह्नित्वत्वाद्यव
च्छिन्नविधेयतावच्छेदकताकानुमितौ च वह्नित्वत्वावच्छिन्नेऽनवच्छेदकत्वावगाही परामर्श इति नानुमितेर्नियमतो द्वि
विधविषयताशालित्वप्रसंग इति। तदप्यसत्। अनवच्छेदकत्वांशे निर्धर्मितावच्छेदकबोधस्य व्यभिचारज्ञानाप्रति
बध्यतया तस्यानुमितिहेतुत्वे व्यभिचारस्य हेत्वाभासत्वानुपपत्तेरिति। मैवं। सामानाधिकरण्यनिरूपकताव
च्छेदकमुद्रया स्वरूपतो वह्नित्वाद्यवगाही हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्ववद्वह्निसमानाधि राम
करणधूमवान्पर्वत इत्याकारकः परामर्शः स्वरूपतो वह्नित्वादिविधेयतावच्छेदकानुमितौ हेतुः। यत्र तु वह्नित्वत्वा ॥२४॥

तावच्छेदक १ द्विनैव वह्नित्वादिकं सामानाधिकरण्यनिरूपकतयाऽवभासते। न तु स्वरूपतः तादृशपरामर्शस्तु पर्वतो वह्नित्ववद्वान्
इत्याकारकानुमितावीति न काप्यनुपपत्तिः। अथैवमपि प्रात्यक्षिकपरामर्शात् केवलं पर्वतो वह्नित्ववद्वानित्याकारकानु
मितिर्दुर्लभा। तादृशपरामर्शे सामानाधिकरण्यनिरूपकतावच्छेदकविधया स्वरूपतो वह्नित्वादिभानेबाधकाभावात्
न च स्वरूपतो वह्नित्वादिविशिष्टबुद्धौ स्वरूपतो वह्नित्वाद्युपस्थितेर्हेतुत्वात् तच्छून्यकालीनपरामर्श एव तथा वह्नित्वा न४
दिकं भासितुमीष्टे इति वाच्यं। स्वरूपतो वह्नित्वाद्युपस्थितिं विना वह्नित्ववादिना वह्नित्वादिभानासंभवात्। वह्नित्वादिभा ९
ने तच्छरीरघटकतया स्वरूपतो वह्नित्वादिभानस्यैवावश्यकत्वादिति चेन्न। सामानाधिकरण्यनिरूपकतावच्छेदकमु
द्रया स्वरूपतो वह्नित्वावगाहितादृशप्रतियोगितानवच्छेदकवह्नित्ववत्समानाधिकरणधूमवान्पर्वत इत्याकारकः
न२ परामर्शः प्रात्यक्षिकः क्वचिदुपपद्यते इति सर्वेषामेवानुमतौ इति तदुपपादनमुभयवादिसिद्धमेव एवं च तत्रैव वह्नि
वि२ त्ववद्वानित्याकारकानुमितिर्निराबाधैवेत्यलं सदावेशेन॥ यत्तु व्यापकत्वं स्वप्रतियोग्यनधिकरणहेतुमन्नि
म१

मध्यमत:

२५ ष्ठाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकवत्वं। तत्रस्वपदार्थोनाभावसामान्यमभावसामान्यप्रतियोग्य
नधिकरणीभूतहेतुमतःसर्वत्रैवाप्रसिद्धेः। अतस्तत्तदभावएवस्वपदार्थोवाच्यः। तथाचतत्तदभावप्रतियोग्यनधि
करणहेतुमन्निष्ठतत्तदभावप्रतियोगितावच्छेदकभेदकूटवत्साध्यतावच्छेदकावच्छिन्नत्वमेवतादृशनिष्कृष्टार्थः। एवं
चतादृशभेदकूटस्यप्रातिस्विकरूपेणज्ञानंयुगसहस्रेणज्ञातुमशक्यमितिव्यापकसामानाधिकरण्यरूपव्याप्ति
र्दुर्ज्ञेयैवकथंतज्ज्ञानस्यानुमितिहेतुता। नचकूटभेदस्यप्रातिस्विकरूपेणदुर्ज्ञेयत्वेपिसामान्यतोहेतुसमाना
क धिकरणाभावप्रतियोगितानवच्छेदकप्रतियोगिभेदत्वादिनाभानसंभवात् नतादृशव्याप्तेर्दुर्ज्ञेयतेतिवाच्यं। व्य
भिचारज्ञानाप्रतिबध्यस्यतादृशसामान्यरूपेणज्ञानस्यानुमित्यनुपयोगितयाऽकिंचित्करत्वात्। नचसाध्याभा
ववदवृत्तित्वरूपव्याप्तावपिसाध्याभावेस्वप्रतियोग्यनधिकरणवृत्तित्वस्यनिवेशनीयतयातुल्योऽनुयोगइति राम
न वाच्यं। तत्रस्वप्रतियोगिपदस्यसाध्यपरत्वेनाननुगमइति। तदपितुच्छमेव। अभावांतस्यस्वानिरूपकाभाववन्निरू ॥२५॥

पितत्वस्यावच्छेदकावच्छिन्नाधिकरणानुयोगिकत्वोभयसंबंधेन प्रतियोगिताविशिष्टान्यायाहेत्वधिकरणनि
ष्ठाधिकरणतातन्निरूपकाभावार्थकतयाऽननुगमाभावात् । संयोगिद्रव्यत्वादित्यादौ द्रव्यादिनिष्ठासंयोगाभावाधि
करणता । तादृशोभयसंबंधेन संयोगत्वाद्यवच्छिन्नप्रतियोगिताविशिष्टैव तदवच्छेदकीभूतसंयोगत्वाद्यवच्छिन्ना
धिकरणानुयोगिकत्वात् । तन्निरूपकीभूतसंयोगाभावादिनिरूपितत्वाच्च । अतस्तादृशसंबंधेन प्रतियोगितावि
शिष्टान्याघटाभावाधिकरणतैव तादृशाधिकरणतायाः यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणानुयोगिकत्वं
तादृशप्रतियोगितानिरूपकाभावनिरूपितत्वाभावेन उक्तसंबंधद्वयेन कस्याश्चिदपि प्रतियोगितायास्तत्र वैशिष्ट्य
स्यासत्त्वात् । तादृशाधिकरणतानिरूपकाभावप्रतियोगितानवच्छेदकत्वं च संयोगत्वादावक्षतमेवेति न तत्राव्याप्तिः ।
संयोगिसत्त्वादित्यादौ द्रव्यनिष्ठसंयोगाभावाधिकरणतायास्तादृशोभयसंबंधेन प्रतियोगिताविशिष्टत्वेपि गुणाद्या
त्मकहेत्वधिकरणतानां तथाविधा । अधिकरणभेदेनाधिकरणताभेदादिति न तत्राव्याप्तिरिति । वस्तुतो हेत्वधिकरण ति१

निष्ठाधिकरण१

26

निरूपितनिरवच्छिन्नाधेयत्वस्याभावविशेषणत्वेनैवोपपत्तौ प्रतियोगिवैयधिकरण्यप्रवेश एव नास्तीति विना न
नुगमसंभावना। अथैवमपि लघुरूपसमनियतगुरुधर्मावच्छिन्नसाध्यकव्यभिचारिण्यतिप्रसंगवारणाय स्व
विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदककंयत्स्वं ता-
२४ वत् भेदकूटविशिष्टसाध्यतावच्छेदकत्वमेव व्यापकत्वमित्यवश्यं वाच्यं। तथाचदुर्ज्ञेयता दुर्वारैवेति चेत्। भवन्म
तेपि तादृशगुरुधर्मावच्छिन्नसाध्यकसद्धेतौ साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्याऽव्याप्ति
रतस्तद्वारणाय साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नाभाववद्वृत्तित्वं
५ विवक्षणीयं। तत्र गुरुधर्मस्यानवच्छेदकत्वमते तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदनिवे
शनमशक्यं। कंबुग्रीवादिमत्त्वावच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वादेः स्वसमनियतघटत्वा राम
वच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वाद्यपेक्षया गुरुत्वेन भेदप्रतियोगितानवच्छेदकत्वात्। तदवच्छिन्नप्र ॥२६॥

तियोगिताकभेदाप्रसिद्धेरितिप्रतियोगितावच्छेदकव्यक्तीः प्रातिस्विकरूपेणोपादायतावतांभेदकूटएवनिवे
श्यतइतितुल्योनुयोगः। गुरुधर्मस्यप्रतियोगितावच्छेदकत्वमतावलंबनेचसमः समाधिरितिनकिंचिदेतत्। इत्थंतु
तत्त्वं॥ सर्वत्रव्यापकसामानाधिकरण्यावगाहिपरामर्शादेवानुमितिरितिननियमः। परंतुकुत्रचित्ततःकुत्रचित्सा
ध्याभाववदवृत्तित्वरूपव्याप्त्यवगाहिपरामर्शादपीत्यनियमपक्षः साधीयान्। ताद्दशानियममतेवह्न्यभाववदवृत्ति
त्वैमपर्वतत्वावच्छिन्नपक्षकघटाद्यनुमितिसामग्रीणामनंतानांभिन्नविषयकप्रत्यक्षादिकं प्रतिप्रतिबंधकता
धिक्यप्रसंगात्। मेममतेतत्रवह्न्यभाववद्वृत्तिमान्पर्वतइत्येताद्दशपरामर्शघटितवह्न्यनुमितिसामग्र्याएवतत्रावश्य
कत्वात्ताद्दशपरामर्शघटितसामग्रीप्रतिबंधकतयैवोपपत्तेः। तासांप्रतिबंधकत्वाकल्पनात्। अथवह्न्यनुमिति
सामग्र्यांपर्वतेवह्न्यभाववानित्येताद्दशबाधाभावस्यावश्यंनिवेशनीयतया ताद्दशबाधादिकालेतथाविधघटा
नुमितिसामग्रीकालेभिन्नविषयकप्रत्यक्षवारणाय ताद्दशसामग्र्याः प्रतिबंधकत्वमावश्यकमितिचेत्। सत्य

मेतादृशायुक्तस्याशुद्धघटत्वावच्छिन्नविधेयकतादृशाविशिष्टधर्मावच्छिन्नपक्षकानुमितिसामग्रीत्वं प्रतिबंधकता
याउभयवादिसिद्धत्वमायातु एवमपि तादृशाविशिष्टधर्मावच्छिन्नपक्षकवह्निमत्पर्वतवान्नि घटत्वावच्छिन्नविधेयका
कानुमितिसामग्रीत्वं प्रतिबंधकत्वाकल्पनप्रयुक्तलाघव[redacted]मक्षतमेव। तादृशानुमितेः पर्वतो वह्न्यभाववा
नित्येतादृशबाधादिप्रतिबध्यतया तत्सामग्रीकाले बाधाभावघटितपर्वतत्वावच्छिन्नपक्षकवह्न्याद्यनुमितिसा
भा मग्र्याः अवश्यं वा नत्। अथैवमपि पर्वतो वह्निमानित्येतादृशानुमितिसामग्र्यां पर्वतो वह्निमानित्येतादृशासिद्ध्यभा
वनिवेशस्यावश्यकतया तादृशासिद्धिकाले तथाविधघटाद्यनुमितिसामग्रीसत्त्वे भिन्नविषयकप्रत्यक्षवारणा
य तादृशसामग्र्याः प्रतिबंधकत्वमावश्यकमिति चेत्। एवमपि पर्वतविशेष्यकवह्निमत्त्वानिर्णयित्वावच्छिन्नस्य
भ्रमत्वं साध्यतावच्छेदककोटौ पक्षतावच्छेदककोटौ वा यत्राधिकं निवेश्य तादृशानुमितिसामग्र्याः प्रतिबंधकत्वा राम
कल्पनप्रयुक्तलाघवं दुर्वारमेव। तादृशानुमितिसामग्रीकाले पर्वतो वह्निमानित्येतादृशासिद्धौ भ्रमत्वनिग्रहस्या ॥२७॥

मा१ वश्यकतया। अग्रे ग्रन्थप्रहाणास्कंदितसिध्यभावघटितवह्न्यनुमितिसामग्र्या आवश्यकत्वात्। नचैवं साध्याभा
ववदवृत्तित्वरूपव्याप्तिज्ञानादेवानुमितिरस्तु नतु व्यापकसामानाधिकरण्यज्ञानादिति वाच्यं। व्यापकसामानाधिक
रण्यज्ञानादनुमितिस्वीकारे विधूमव्यापकवह्निसमानाधिकरणधूमवत्पर्वतत्वावच्छिन्नपक्षकघटानुमितिसाम
ग्र्याः भिन्नाविषयकप्रत्यक्षादिकं प्रति प्रतिबंधकत्वाकल्पनेन आधवसंभवात्। एवं साध्याभावव्यापकीभूताभाव
५ प्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानस्यानुमितिहेतुत्वमुपेयते। तथा सत्यप्युक्तरीत्या आधवसंभवात्॥ केचित्तु
अन्वयव्याप्तिज्ञानात् पर्वतो वह्निमानित्याकारिका व्यतिरेकव्याप्तिज्ञानात् पर्वतो वह्न्यभावाभाववानित्याका
रिकानुमितिर्जायते। अथ उभयविधव्याप्तिज्ञानात् एकविधानुमित्यभ्युपगमे क्षतिविरहः। परामर्शवैशिष्ट्यस्य का
८२ र्यतावच्छेदककोटौ वश्यं निवेशनीयत्वेव परस्परं व्यभिचाराप्रसक्तेः। नचोभयविधव्याप्तिज्ञानात् पर्वतो वह्निमा
नित्येतादृशानुमितिस्वीकारे सिद्धिप्रतिबंधकतायाः द्वयविशिष्टपरामर्शाणामुत्तेजकत्वमते पर्वतो वह्निमा

58

नित्ये तादृशासिद्धिप्रतिबंधकतायामेकत्रान्वयव्याप्त्यवगाहिपरामर्शव्यतिरेकव्याप्त्यवगाहिपरामर्श
योरेकत्रोत्तेजकत्वप्रसक्त्या तदभावयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबंधकताधि
क्यमिति वाच्यं। व्यतिरेकव्याप्तिज्ञानात् पर्वतो वह्न्यभावाभाववानित्यनुमितिस्वीकारेपि पर्वतो वह्न्यभावाभा
ववानित्येतादृशासिद्धिप्रतिबंधकतायां एकत्र वह्न्यभावाभावत्वावच्छिन्ननिरूपितान्वयव्याप्तिविषयकपराम
र्शोपदर्शितव्यतिरेकव्याप्तिविषयकपरामर्शयोरुत्तेजकताप्रसंगेन तद्दोषतादवस्थ्यात्। तादृशान्वयव्याप्ति
ज्ञानादपि पर्वतो वह्न्यभावाभाववानित्येतादृशानुमित्युत्पत्तेः। किंचैतन्मते व्यतिरेकव्याप्त्यवगाहिपरामर्श
जन्यानुमितौ अभावो न शरीयइत्याकारक बाधाद्यभावस्याधिकस्य हेतुतया तादृशपरामर्शघटितानुमितिसा
मग्रीप्रतिबंधकतायां तथाविधबाधाभावनिवेशे गौरवमिति भेवं। व्यतिरेकपरामर्शात् वह्न्यभावाभावव राम
नित्येतादृशानुमितिस्वीकारे प्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावविशिष्टाभाववैशिष्ट्या ॥२८॥

६३

वगाहिप्रत्यक्षादौ व्यतिरेकव्याप्त्यवगाहिपरामर्शघटितानुमितिसामग्र्याः प्रतिबंधकत्वाकल्पनेन लाघवं। ता
दृशपरामर्शघटितानुमितिसामग्रीकालेऽभावो न वह्नीय इत्याकारकबाधादिबुद्धेरभावस्यावश्यकतया विरो
धितावच्छेदकप्रकारकनिर्णयरूपकारणविरहेणैव तादृशविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षवारणसंभवादित्याहुः।
॥ मीमांसकानुयायिनस्तु॥ व्यतिरेकव्याप्तिज्ञानात् अर्थापत्त्याख्या विलक्षणप्रमितिरेवोत्पद्यते न त्वनुमितिः।
तदनंतरमर्थापिपद्यामीति विलक्षणानुव्यवसायस्यैवोत्पत्तेः। अनुव्यवसायानादरे व्याप्यवत्ताविनिर्णयाधीनप्र
त्यक्षात्मकसाध्यनिर्णयादेव प्रवृत्त्यादिकार्यनिर्वाहेणानुमित्यात्मकविलक्षणप्रमितेरप्यप्रसिद्ध्यापत्त्यानु
मानस्यापि पृथक्प्रमाणतानुपपत्तेरिति व्यतिरेकव्याप्तिज्ञानं प्रमाणांतरमेवानवानुव्यवसायबलात् व्य
तिरेकव्याप्तिज्ञानजन्यानुमितेरसिद्ध्यनुतावत् ज्ञाति विशेषः। सत्तावत् अनुमितित्वव्याप्य एवेति न व्यतिरेकव्या
प्तिज्ञानस्य प्रमाणांतरीतिवाच्यं। तादृशज्ञातेरनुमितित्वव्याप्यत्वे मानाभावात्। न चार्थापत्तित्वस्य अनुमिति

त्वविरुद्धत्वे सिद्धिकाले तद्धारणायतत्र सिद्ध्यभावस्य कारणत्वांतरं कल्प्यं। अनुमितित्वव्याप्यत्वे तु अनु
२९ ला०२ मितित्वावच्छिन्नप्रतितद्धेतुत्वकल्पनयैवोपपत्तेर्लाघवमिति वाच्यं। सिद्धिकाले अर्थापत्त्यभ्युपगमे क्षतिविरहात्
वस्तुतस्तु सिद्धिकाले अर्थापत्त्यनुत्पादस्य प्रामाणिकत्वे तत्र सिद्धेः पृथक्प्रतिबंधकत्व [redacted] कल्पनमावश्यकं। अ
पा र्थापत्तित्वप्रकारेच्छाधीनानुमितौ व्यभिचारेणानुमित्साविरहविशिष्टसिद्ध्यभावजन्यतावच्छेदककोटौ अर्थाप
त्तिव्यावर्त्तकविशेषणप्रक्षेपस्यावश्यकतया ऽर्थापत्त्यन्यानुमितिस्थलीयप्रतिबंधकतया अर्थापत्तिवार
णासंभवात्। न चार्थापत्तित्वप्रकारेच्छासाधारणानुमितिविषयकेच्छात्वेनैवानुमित्साया उत्तेजकत्वान्न
तादृशेच्छाधीनार्थापत्तौ अनुमित्साविरहविशिष्टसिद्ध्यभावस्य व्यभिचार इति वाच्यं। अर्थापत्तित्वप्रकारेच्छा
साधारणरूपेण अनुमित्साया उत्तेजकत्वे तादृशेच्छाकाले व्यतिरेकव्याप्तिज्ञानासत्त्वे सिद्धिसत्त्वे ऽनुमित्यापत्तेः। राम
धा अनुमित्सायास्तादृशेच्छाव्यावृत्तरूपेणोत्तेजकत्वं अपि तु तादृशेच्छाया अपि व्यतिरेकपरामर्शविशिष्ट ॥२९॥

तथाविधेज्ञातत्वेनपृथक्पृथगुत्तेजकत्वमितिचेन्न।तदपेक्षयाअर्थापत्तौअर्थापत्तीच्छाविरहविशिष्टसिद्धेः
पृथक्प्रतिबंधकत्वमेवकल्पयितुमुचितं।अथार्थापत्तित्वस्यानुमितित्वविरुद्धत्वेप्रमाणसंवलनदशायामर्था ५२
पत्ति[illegible]रनुमितिर्वास्वीकरणीयाइत्यत्रविनिगमनाविरहः।उभयोरुपगमेचव्यक्तिकल्पनाबाहुल्यं।व्यक्तिपोवा
ताकृत्यता ४ पर्याप्तिनिर्वाहककारणगौ[illegible]पिवक्ष्यं च।नचतत्रकिमपिनोत्पद्यतइतिवाच्यं।ज्ञानसामान्यानुत्पादस्यानुभववि
रुद्धत्वात्।सामग्रीसत्वेकार्योत्पादेबाधकाभावाच्चेतिचेत्।मैवं।अर्थापत्तिंप्रतिअनुमितिसामग्र्याअनुमितिं
प्रतिअर्थापत्तिसामग्र्यावाप्रतिबंधकत्वकल्पनेनैवानुपपत्त्यभावात्।नचैतादृशप्रतिबध्यप्रतिबंधकभावे
गौरवमितिवाच्यं।घटादिप्रत्यक्षंप्रतितथाविधसामग्र्याःप्रतिबंधकत्वेकल्पनीयेप्रत्यक्षत्वादिकंप्रतिप्रति
बध्यतावच्छेदककोटावनिवेश्यतादृशसामग्रीविशिष्टान्यत्वावच्छिन्नंप्रतितादृशसामग्रीत्वेनप्रतिबंधकत्वक
ल्पनेलाघवेननिर्वाहसंभवात्।नचोपदर्शितसामग्रीसंवलनदशायांसामान्यसामग्रीबलादेकविशिष्ट

नुमिति ३

30 परस्यापत्तिर्दुर्वारैवेतिवाच्यं।अनुमितिसामान्यसामग्र्याफलजननेअर्थापत्तिसामग्र्यभावस्यअर्थापत्ति
सामग्र्याभाफलजननेऽनुमितिसामग्र्यभावस्यसहकारित्वकल्पनेनैवउपदर्शितदोषासंभवात्।नचपरस्पर
मेव३ सहकारित्वकल्पनेगौरवमितिवाच्यं।अर्थापत्तिसामग्र्यनुमितिसामग्र्योः परस्परसहकारित्वकल्पनेनपर्व भाव३
तोवह्निमानित्यनुमितिसामग्र्यादेःवह्न्यभावव्यापकीभूताभावप्रतियोगिवह्निमान्पर्वतोघटवानित्याकार भूम४
कप्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्र्यभावादेःसहकारित्वकल्पनेलाघवस्यजागरूकत्वात्।एवंतादृशप्रत्य मे५
क्षेच्छाविशिष्टप्रत्यक्षसामग्रीकालेअर्थापत्तिसामग्र्याआवश्यकत्वेनार्थापत्तिसामग्र्यभावघटितानु
मितिसामग्र्याअभावेनतदानीमनुमित्यनुत्पादनिर्वाहेणानुमितेस्तादृशसामग्र्याःप्रतिबंधकत्वाक
[redacted]कल्पनप्रयुक्तलाघवमपिअनुमित्यादिकंप्रत्यर्थापत्त्यादिसामग्र्याःप्रतिबंधकत्वकल्पनवादिना राम
मतेऽक्षतमेवेत्याकूतः॥ ॥छ॥ ॥श्रीः॥ ॥इतिश्रीभट्टाचार्यहरिरामतर्कालंकारवागीशकृतौनवी ॥३०॥

३।

नमतविचारःसमाप्तिंपफाराः॥ ॥७॥ ॥श्रीसांबादित्यायनमः॥ ॥श्रीलक्ष्मीनारायणाभ्यांनमः

[redacted]

अकालवाद २१

नं० १२६६